Parasar
Shivarchandipika
शिवार्चनदीपिका
Sanskrit
Paper – Handwritten
N.A. (very old)
144 Folio
10.8" x 4.6"
Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१·१२६

नं. २७६

शिवार्चन दीपिका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१

श्रीगणेशायनमः॥शिवसर्वाधिक्यंलिख्यते॥श्रीशिवार्चनदीपिकाप्रारंभः॥
श्रीपराशरोपपुराणे॥पराशरउवाच॥अथातःसंप्रवक्ष्यामिदेवताधिक्यमादरा
त्॥यस्यस्मरणमात्रेणप्रसीदतिमहेश्वरः॥१॥अचेतनेभ्यःसर्वेभ्यश्चेतना
अधिकामुने॥चेतनेषुमनुष्याश्चमनुष्येष्वधिकाद्विजाः॥द्विजेषुब्राह्मणा
स्तेषुकुलीनाअधिकास्मृताः॥तेभ्योमनुष्यगंधर्वाअधिकावेदवित्तम॥तेभ्यो
पिदेवगंधर्वापितरश्चततःपरम्॥कर्मदेवसमाख्याश्चतथादेवास्ततःपरम्॥
तेभ्यइन्द्रोधिकस्तस्मादधिकस्तुबृहस्पतिः॥बृहस्पतेरधिकप्राणःप्रजानाथोधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कस्ततः॥प्रजापतेरपिब्रह्माब्रह्मणोविष्णुरात्मिकाः॥विष्णोरपिहरस्तस्मान्मायीसाक्षा
न्महेश्वरः॥ततोधिकतरःसाक्षाच्छिवःसाम्बःसनातनः॥तदन्यद्विश्वमीशानःसतु
विश्वाधिकःशिवः॥यानिवेदांतवाक्यानितानिसर्वाणिसत्तम॥विश्वाधिकपराण्ये
वनै वविश्वपराणिवै॥तथास्मृतिपुराणानिभारतादीनिचास्तिक॥शास्त्रांतरा
णितर्काश्चश्रुत्यनुग्राहकास्तथा॥विनासाक्षाच्छिवंसाम्बंप्रमाणान्यखिलान्य
पि॥विश्वाधिकतयानान्यंप्रवदन्तिकदाचन॥माहेश्वरपुराणानिसमस्तानिम
हामुने॥अप्रसाधारणयामूर्त्यानाम्नाऽसाधारणेनच॥वदंतिपरमंतत्वंशिवंसाम्बं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिलोचनम् ॥ तत्स्थं तं स्वपरानंदं प्रमोदं चन्द्रशेखरम् ॥ त्रिमूर्त्तिनां हरं चापि तदंतंत
स्य वै भवम् ॥ तदंशस्यापि भानं च वदन्ति च महामुने ॥ वैष्णवानि पुराणानि सम
स्तानि महामुने ॥ त्रिमूर्तीनां हरेर्नाम्ना मूर्त्यो तस्य परं पदम् ॥ प्रवक्ष्यति पुराणे ह्ब्रा
ह्मे चैवानया दिशा ॥ आग्नेयं च तथा सौरं पुराणं पण्डितोत्तम ॥ अष्टादश पुराणा
नां निष्ठा काष्ठा महेश्वरः ॥ गुणाभिमानिनो नैव ब्रह्मविष्णुमहेश्वराः ॥ वैष्णवानि
पुराणानि त्रिमूर्तीनां हरे रपि ॥ तदंशस्य तदंशस्य वैभवं च वदंति वै ॥ योपकर्षो हरे
र्दृष्टः शाम्भवेष्वखिलेषु च ॥ पुराणेषु हरेः साक्षान्मूलभूतस्य सत्तम ॥ वैष्णवेषु पुरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रोषुयोपकर्षस्तुदृश्यते॥रुद्रस्यासौहरस्यास्यविभूतेरेवकेवलम्॥उत्कर्षोयःपु
राणेषुदृश्यतेशाम्भवेषुच॥रुद्रस्यासौस्वरूपेणामुनेनत्वात्मनापिच॥उत्क
र्षोयःपुराणेषुवैष्णवेष्वखिलेषुच॥असौतत्वात्मनांविष्णोर्नस्वरूपेणसत्त
म॥एवंपुराणयोःसाक्षाद्ब्रह्मणोदर्शितंचदिक्॥पावकस्यपुराणेचतथासौ
रेचसत्तम॥आधिक्यंदेवदेवस्यशिवस्यपरमात्मनः॥अविज्ञायनरोविष्णुंव
रिष्ठंमन्यतेभ्रमात्॥सूतसंहितायाम्॥खद्योतोयदिचण्डभानुसदृशस्तुल्यो
हरिःशम्भुनाकिंपाकोयदिचंदनेनसदृशस्तुल्योहमीशेनच॥अज्ञानंयदिवेद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नेनसदृशंदेवेनतुल्याजनाकिम्बक्ष्येसुरपुंगवाग्रहमहोमोहस्यदुःश्चेष्टितम्॥पर
मशिवःपरमेश्वरःप्रसन्नोयदिविमलापरमानुभूतिरेषांनहिसकलैर्विमलैरूपाय
वंदेर्नचहरिरगानमयातथापरेरगा॥मायावलेनैवहरिंशिवेनसमानमाहुपुरू
षाधमाश्च॥मोहेनकेचिन्ममसाम्यमाहुर्मायानुशैवीखलुदुस्तरेव॥शिवरह
स्ये॥विहीनंवासमंवापिब्रह्मणाहरिणाहरम्॥येपश्यन्तिसदातेतुनिरयेपतं
तिध्रुवम्॥विष्ण्वादिदेवतासाम्यंयोवदेदीश्वरेशिवे॥सदुर्भगःशिवद्वेष्टाद्वेषस्त
त्साम्यधीःशिवे॥यतःश्रुतोशिवान्यस्यविष्णोरन्यस्यवाद्विजाः॥विश्वाधिकत्वंनैवो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्तः स्तोत्रार्थमपि सर्वथा ॥ शिवं विष्ण्वाधिकत्वेन श्रुतिश्रुत्यमनामयम् ॥ यो विष्णु-
साम्यतां ब्रूयात्स वेदेभ्यो वहिः कृतः ॥ भालाक्षे सति कोन्यदेवभजनासक्तो भ
वेद्भूतले त्यक्त्वा जारजमेव केवलमजोपेंद्राद्दिदेवार्चिते ॥ रत्नं किं परिहृत्य का
चशाकलं वा छन्रजनो जीवनं धन्यं किं मनुते जनै रमिनुतः किं तादृशो जाय
ते ॥ हरिब्रह्मादिदेवेभ्यः श्रेष्ठं पश्यन्ति ये हरम् ॥ ते महाघोरसंसारात् मुच्यं
ते नात्र संशयः ॥ पराशर उवाच ॥ राजाधिराजः सर्वेषां त्र्यंबकस्त्रिपुरांतकः
॥ तस्यैवानुचरा सर्वे ब्रह्मविष्ण्वादयः सुराः ॥ मुक्तिहेतुपरिज्ञानं तत्प्रसादेन के

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
४

वलम्॥नैवविष्ण्वादिदेवानांप्रसादेननसंशयः॥तदन्यत्सकलंविश्वंसहिविश्वार
धिकःशिवः॥सएवजगतांनाथःसहिसंसारमोचकः॥कल्पसंख्यादिनंचैकंब्र
ह्मणःकथ्यतेशिवे॥चतुर्युगसहस्राणांपरिवर्तोहिकल्पकः॥ब्रह्मणोह्यायु
षोंतेचमहाप्रलयउच्यते॥विष्णोरेकदिनंप्रोक्तंतस्यान्तेरौद्रिकंदिनम्॥तस्यान्तेई
श्वरस्याहस्तस्यान्तेपसदाशिवः॥ [illegible]
[illegible]॥ [illegible]॥इतिशि
वाधिक्यंसमाप्तम्॥अथभस्ममाहात्म्यंलिख्यते॥यद्यत्कार्यसहस्राणिकृत्वायः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नातिभस्मना॥तत्सर्वंदहतेभस्मयथाग्निस्तेजसावनम्॥१॥अनेकजन्मशुद्धा
नांश्रौतस्मार्तानुवर्त्तिनाम्॥वेदोक्तेनैवमार्गेणत्रिपुण्ड्रेजायतेरतिः॥२॥अतः
सर्वंपरित्यज्यत्रिपुण्ड्रंदेहगुण्ठनम्॥नित्यंप्रयत्नतःकुर्यान्मुमुक्षुर्मुच्यतेऽ
चिरात्॥३॥यावंतःपतिताभूमौभस्मनःपरमाणवः॥तावद्वर्षसहस्राणि
रौरवंनरकंव्रजेत्॥इत्येवंभस्मपतनेबहुदोषस्यकीर्त्तनात्॥भूत्वात्यंतंसाव
धानोधारयेद्भस्मबुद्धिमान्॥४॥उद्धूलनंत्रिपुण्ड्रंचश्रद्धयानाचरंतिये
॥तेषांनास्तिशिवज्ञानंकल्पकोटिशतैरपि॥५॥अहोमोहस्यमाहात्म्यंमुनीं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्राब्रह्मवादिनः॥ यन्नराभस्मसंत्यज्यकुर्वन्त्यन्यत्समाहिताः॥७॥ यन्नभुंजीत
भस्मांगीमूर्खोवापण्डितोपिवा॥ तत्रभुंक्तेमहादेवःसपत्नीकोवृषध्वजः॥
८॥ भस्मसंछन्नदेहायप्रणामंकुरुतेतुयः॥ सर्वपातकयुक्तोपिससद्यः
पूयतेनरः॥९॥ तेनाधीतंश्रुतंतेनतेनसर्वमनुष्ठितम्॥ येनविप्रेणशि
रसित्रिपुण्ड्रंभस्मनाधृतम्॥१०॥ वेदोदितेनमार्गेणभस्मनोद्धूलनेन
कीकटेष्वपिदेशेषुयत्रभूतिविभूषणाः॥ मानवस्तुवसेन्नित्यंकाशीक्षेत्रस
मंहितत्॥११॥ वेदोदितेनमार्गेणभस्मनोद्धूलनेनच॥ त्रिपुण्ड्रधारणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नैवज्ञानंसम्यग्विजायते॥१२॥त्वष्टासृष्टिच्छलेनाहत्रिपुराड्रस्यप्रशस्तिकाम्॥
ससर्जेसललाटंहितिर्यकृनोर्ध्वनवर्तुलम्॥१३॥तिर्यकृरेखाःप्रदृश्यन्तेललला
टेसर्वदेहिनाम्॥तथापिमानवामूर्खानकुर्वन्तित्रिपुराड्रकम्॥१४॥उद्धूलनंत्रि
पुराड्रंचयैःसमाचरितंमुदा॥तएवशिष्टाविद्वांसोनेतरेमुनिपुंगवाः॥१५॥ब्र
भक्ष्यमक्षरांयेषांभस्मधारणपूर्वकम्॥तेषांतद्भक्ष्यमेवस्यान्मुनेनात्रविचा
रणा॥१६॥सर्वतीर्थेषुयत्पुरायंसर्वतीर्थेषुयत्फलम्॥तत्फलंलभतेसर्वभस्म
स्ना ना॰ न्नसंशयः॥महापातकयुक्तोवायुक्तोवाचोपपातकैः॥भस्मस्नानेनतत्स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेदहत्यग्निरिवेंधनम्॥१८॥किंयज्ञैः किमनेकतीर्थगमनैः किंवेदपाठश्रमैः
किंघोरैर्विविधैस्तपोभिरमलैः किंमंत्रतंत्रैर्जपैः॥किंध्यानैः किमनेकदाननि
करैः किंसांख्ययोगश्रमैः मोक्षार्थीसितभस्मनाचनिपुणाः कुर्यात्त्रिपुंड्रंबु
धः॥१९॥अवैदिकंपापहेतुमूर्द्ध्वपुंड्रंद्विजा अपि॥करिष्यन्त्यतियत्नेनघो
रेकलियुगेद्विजाः॥२०॥ब्राह्मणोपिस्वयंमोहादूर्ध्वपुंड्रंबिभर्तियः॥स
पतत्येवनरकेयावदाचंद्रतारकम्॥२१॥एतेश्लोकाः कौर्म्यमात्स्यवासिष्ठलिं
गाद्यनेकग्रंथस्थाश्रौतसिद्धांतग्रंथेसंग्रहीतालिखिताः॥शिवरहस्येन्त्ती

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यांशे॥भस्मनापूजयेल्लिंगं त्र्यंबकेराग्समुच्यते॥सर्वस्मादपिपापेभ्योसमुक्तो
मोचयेत्परान्॥सजीवन्शिवतामेतिसाक्षाद्रुद्रसमोभवेत्॥भस्मचैतद्विहा
यैवमन्यपुराड्रधरोयदि॥मुक्तिंविंदेतचेदस्मात्सागरेसंप्लविष्यति॥विषपा
नेननित्यत्वंयदिविंदेतमानवः॥भस्मस्नानविहीनोयःसभवेन्मायायावृतः
॥योभस्मस्नानयुक्तोभवतिसुरनरोसद्द्विजोवाधमोवा॥नैवान्यत्रभगवत्प्र
मोदजनकंज्ञानंमहत्प्राप्नुयात्॥शिवधर्मेशास्त्रेशिवरहस्ये॥विभूतिधा
रणांत्यक्त्वायःसत्कर्मसमाचरेत्॥तत्कृतंचाकृतप्रायंभवत्येवनसंशयः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ७

॥नगायत्र्युपदेशोपि भस्मनोधारणंविना॥ततोधृत्वैवभस्मा गेगायत्री
जपमाचरेत्॥गायत्रीमूलमेवाहुर्ब्राह्मण्यंमुनिसत्तमा॥साभस्मधारणा
भावेनकेनाप्युपदिश्यते॥नतावदधिकारोस्तिगायत्रीग्रहणेनघ॥पावनंभ
स्मभालादौधृतमग्निसमुद्भवम्॥यथोपवीतरहितैःसंध्यानक्रियतेद्विजैः
तथासंध्यानकर्त्तव्याविभूतिरहितैरपि॥गतोपवीतेसंध्यायांकायःप्रतिनि
धिःक्वचित्॥विभूतिधारणेत्वन्योनास्तिप्रतिनिधिःक्वचित्॥विभूतिधार
णंत्यक्त्वायदिसंध्यांकरोतियः॥प्रत्यवैत्येनतेनासौनाधिकारीतदाद्विजः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न

यथाश्रुत्वांत्यजोवेदान्प्रत्यवैतितथाद्विजः॥प्रत्यवैतिनसंदेहः संध्याकृद्भस्म
वर्जितः॥संपादनीयंयत्नैःश्रोतंभस्मसदाद्विजैः॥स्मार्त्तंवानदभावेतुलौकि
कंवासमाहितैः॥यादृशंतादृशंवास्तुपवित्रंभस्मसंततं॥धारणीयंप्रयत्नेन
द्विजैःसंध्यादिकर्मसु॥अनंतैर्वारुणैःस्नानैःयःपुण्यंप्राप्यतेद्विजैः॥ततो
नंतगुणंपुण्यंभस्मस्नानादवाप्यते॥कालत्रयेपिकर्त्तव्यंभस्मस्नानंप्रयत्न
तः॥भस्मस्नानंयतःश्रोतंतत्त्यागीपतितोभवेत्॥इतिभस्ममहात्म्यसमाप्तः
॥शिवाराधन भस्मविधीलिख्यते॥दीपीकायाम्॥स्नपनोपक्रमेपादौक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रौप्रक्षाल्यवाग्यतः॥आचम्योक्तासनेस्थित्वाप्राङ्मुखोवाप्युदङ्मुखः॥पवित्र
हस्तस्त्रितयःप्राणायामंसमाचरेत्॥ततोमूलेनभसितमष्टकृत्वोभिमंत्र्य
च॥ईशानेनशिरोदेशंमुखंतत्पुरुषेणतु॥उरोदेशमघोरेणनाभिंवामेन
गोपते॥सद्येनपादौसर्वांगंप्रणवेनैवधूलयेत्॥एवंस्नानक्रमःप्रोक्तःस्ना
नमेवंसमाचरेत्॥भस्माभिमंत्रेणविशेषःसिद्धान्तागमे॥भस्मवामकरेस्था
प्यदक्षिणेनाभिमंत्रयेत्॥सद्यादिमंत्रैस्तैरेवभस्मनोद्धूलनंचरेत्॥अथम
स्मस्नानेप्रकारांतरम्॥स्कंदपुराणेसौरसंहितायाम्॥अग्निरित्यादिभिर्मंत्रैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सप्तभिः शुद्धभस्मना॥ सर्वाङ्गोद्धूलनं कुर्यात् शिरोव्रतमिदं स्मृतम्॥ एतच्छि
रोव्रतं कुर्यात् संध्याकालेषु सादरम्॥ यावद्विद्योदयस्तावत्तस्य विद्यां लभेत ख
मा॥ द्वादशाब्दमथाब्दं वा तदर्धं वा तदर्धकम्॥ प्रकुर्यात् द्वादशाहं वा दिनत्र
यमथापि वा॥ तदर्धं दिनमेकं वा संकल्पेन शिरोव्रतम्॥ शिरोव्रतं श्रेष्ठ
व्रतमित्यर्थः॥ एवमस्यैव नामांतरं तत्रैव॥ अग्निरित्यादिभिर्मंत्रैः सर्वा
गोद्धूलनं तथा॥ त्रिपुंड्रधारणं चापि वदंत्यत्याश्रमं बुधाः॥ अयमत्याश्र
मो धर्मो यैः समाचरितो मुदा॥ तेषामेव शिवज्ञानं संसारोच्छेदकारकम्॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्याश्रमोधर्मः सर्वाश्रमधर्माधिकोधर्मः॥परमहंसधर्मइत्यर्थः॥एतस्यैव नामांतरम्॥अथर्वशिरसि॥अग्निरित्यादिनाभस्मगृहीत्वांगानिसंस्पृ शेत्॥व्रतमेतत्पाशुपतंपशुपाशविमोक्षणाय॥तथाचस्कांदे॥व्रतंपाशु पतंचीर्णंयैर्द्विजैरादरेणतु॥तेषामेवोपदेष्टव्यमितिवेदानुशासनम् ॥पाशुपतंपारमेश्वरव्रतमित्यर्थः॥त्रिपुंड्रधारणविधीलिख्यते॥त्रिपु ंड्रकरणेऽ[illegible]गुलीनियमः॥कालाग्निरुद्रोपनिषदि॥त्रिपुंड्रंधारयेत्स नि श्चाद्ब्रह्मविष्णुशिवात्मकम्॥मध्यांगुलीभिरादायतिसृभिर्मूलमंत्रे

तम्॥अनामामध्यमांगुष्ठैरथवास्यात्त्रिपुराङ्कम्॥त्रिपुराड्रप्रमाणंक्रिया
सारे॥मंध्यमांगुलित्रयेणैवस्वदक्षिणाकरस्यतु॥षडंगुलायतंमानमपि
चाधिकमानकम्॥नेत्रयुग्मप्रमाणंवाभालेदीर्घंत्रिपुराङ्कम्॥कदा
चिद्भस्मनाकुर्यात्सरुद्रोनात्रसंशयः॥द्वितीयपक्षे विशेषउक्तस्तत्रै
व॥मध्यमानामिकांगुष्ठैरनुलोमविलोमतः॥धारयेद्यस्त्रिपुराङ्का
कंसरुद्रोनात्रसंशयः॥त्रिपुराड्रधारणस्थानान्युक्तानिरत्नावल्याम्
॥ललाटेहृदयेनाभौगलेंशेबाहुसंधिषु॥पृष्ठदेशेशिरस्येवंस्थानेष्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेषु धारयेत्॥ त्रिपुण्ड्रधारणविशेषविधिः॥ कालाग्निरुद्रोपनिषदि॥ सद्यो
जातादिपञ्चब्रह्ममंत्रैः परिगृह्याग्निरित्यादिभिर्मंत्रैश्चाभिमंत्र्य मानस्तो
केतिसमुद्ध्य शन्नोदेवीतिजलेनसंसृज्य॥ मानोमहान्तमित्यालोड्य॥ त्रियं
बकमिति त्रियायुषमितिचशिरोललाटवक्षोभुजस्कंधेषु तिर्यक्तिस्रो
रेखाः प्रकुर्वीत व्रतमेतच्छांभवं सर्ववेदेषु वेदवादिभिरुक्तं भवति तस्मात्
समाचरेन्मुमुक्षुरपुनर्भवाय॥ वायवीयसंहितायाम्॥ भस्माग्निहोत्र
जं वाथ विरजाग्निसमुद्भवम्॥ औपासनाग्निजं वापि समिदग्निसमु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्रवम्॥ आदरेणसमादायशुद्धेपात्रेनिधायतत्॥ प्रक्षाल्यपादौहस्तौचद्विरा
चम्यसमाहितः॥ गृहीत्वाभस्मजप्तंचब्रह्ममंत्रैःशनैःकरे॥ प्राणायामत्रयं
कृत्वाअग्निरित्यादिमंत्रितम्॥ तैरेवसप्तभिर्मंत्रैस्त्रिवारमभिमंत्रयेत्॥
आपोज्योतिरित्युक्त्वाध्यात्वाविष्णुंजलाधिपम्॥ संयोज्यभस्मनातो नो
यंअग्निरित्यादिभिःपुनः॥ निमृज्यसांबंध्यात्वासमुद्धूल्यापादमस्तकम्
॥ तेनभावनयाब्रह्मन्पूतेनसितभस्मना॥ ललाटवक्षस्कंधेषुस्वाश्रमोचि
तमंत्रतः॥ मध्यमानामिकांगुष्ठैरनुलोमविलोमतः॥ त्रिपुंड्रंधारयेन्नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
११ न्यं त्रिकालेष्वपि भक्तितः ॥ मूत्राद्युत्सर्जनांतेपि भस्मस्नानं प्रयत्नतः
॥ कर्त्तव्यमन्यथा पूता न भविष्यति मानवाः ॥ विधिवत्कृतशौचोपि भ
स्मस्नानं विना द्विजाः ॥ न भविष्यति पूतात्मा नाधिकार्यपि कर्मणि ॥ ०
अपानवायुनिर्याणे जृंभणे स्कंदने क्षुते ॥ श्लेष्मोद्गारेपि कर्त्तव्यं भस्म
स्नानं प्रयत्नतः ॥ इति शिवरहस्ये ॥ उमादेव्या च लक्ष्म्या च वाचान्याभिरा २
स्तिकाः ॥ सर्वैस्त्रीभिर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ॥ इति भस्मविधी
समाप्तः ॥ श्रीरुद्राक्षमहात्म्यं लिख्यते ॥ धत्ते रुद्राक्षकंठाय यस्त्वनं संप्रय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च्छति॥त्रिःसप्तकुलमुद्धृत्यरुद्रलोकंसगच्छति॥शुचिर्वाप्यशुचिर्वा
प्यभक्ष्यस्यचभक्षकः॥म्लेछोवाप्यथचांडालोयुक्तोवासर्वपातकैः
॥रुद्राक्षधारणादेवसरुद्रोनात्रसंशयः॥खादन्मांसंपिबन्मद्यंसगच्छ
न्नंत्यजामपि॥पातकेभ्योविमुच्येतरुद्राक्षेशिरसिस्थिते॥सर्वयज्ञतपोदा
नवेदाभ्यासैश्चयत्फलम्॥तत्फलंलभतेसद्योरुद्राक्षस्यतुधारणात्
॥शिरसाधारणेकोटिःकर्णयोर्दशकोटयः॥शतकोटिर्गलेबंधेमूर्द्धि
कोटिसहस्रकम्॥अयुतंचोपवीतेतुलक्षकोटिर्भुजेधृते॥अप्रमेयंमणि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१२

वंधेतुरुद्राक्षंमोक्षसाधकम्॥रुद्राक्षधारणाच्छ्रेष्ठंनकिञ्चिदिहविद्यते॥अभं
त्रधारणस्यैवगुणाएतेप्रकीर्त्तिताः॥यःपुनर्मंत्रसंयुक्तंधारयेद्भक्तितोनरः॥
गुणानंतस्यमाहात्म्यंकथितुंनैवशक्यते॥एतेचैवगुणावत्सतवप्रीत्यामयोदि
ताः॥स्वशिष्येभ्यस्तुवक्तव्यानाशिष्येभ्यःकदाचन॥अभक्तस्यापिमूर्खस्य
नकदाचित्प्रकाशयेत्॥कुलीनमकुलीनंवाभूतिरुद्राक्षधारिणम्॥दृष्ट्वो
त्तासनेस्थित्वारौरवंनरकंव्रजेत्॥हारंवाकटकंवापियत्रकुत्रमहामुने॥
अमंत्रकंवामंत्रेणसहितंभाववर्जितम्॥योवाकोवानरोनित्यंधारयेद्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञयाविना॥सर्वपापविनिर्मुक्तः सम्यक्ज्ञानमवाप्नुयात्॥ एतेऽश्लोकाः कौ
र्म्यमात्स्यवासिष्ठलिंगाद्यनेकग्रंथस्याश्रौतसिद्धांतग्रंथेसंगृहीतालि
खिताः॥दर्शनादिफलंतत्रैवलिख्यते॥लक्षंतद्दर्शनात्पुण्यंकोटिस्तत्स्प
र्शनाद्भवेत्॥शतकोटिगुणंपुण्यंधारणाल्लभतेनरः॥लक्षकोटिसहस्रा
णिलक्षकोटिशतानिच॥जपाच्चलभतेपुण्यंनात्रकार्याविचारणा॥०
शिवभक्तायशांतायदद्याद्रुद्राक्षमुत्तमम्॥तस्यपुण्यफलस्यांतंनचा
हंवक्तुमुत्सहे॥पशवोपिहिरुद्राक्षधारणाद्यांतिरुद्रताम्॥किमुयेधा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१३

रयंतीस्मनरारुद्राक्षमालिकाः॥तथाचस्कांदे॥उच्छिष्टोवाविकर्मस्थोयु
क्तोवासर्वपातकैः॥मुच्यतेसर्वपापेभ्योरुद्राक्षस्यतुधारणात्॥जपध्या
नविहीनोपिरुद्राक्षंयदिधारयेत्॥सर्वपापविनिर्मुक्तःसयातिपरमांग
तिम्॥रुद्राक्षधारकोभूत्वायत्किंचित्कर्मवैदिकम्॥कुर्वन्विप्रःसदाभक्त्या
महदाप्नोतितत्फलम्॥प्रयाणकालेरुद्राक्षंबंधयित्वाम्रियेद्यदि॥सरुद्र
त्वमवाप्नोतिपुनर्जन्मनविद्यते॥ब्राह्मणोवापिचांडालोदुर्गुणःसुगुणोपि
वा॥भस्मरुद्राक्षधारीयःसदेहांतेशिवंव्रजेत्॥प्रमिश्रोवाऽनभिश्रोवारुद्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षस्यतुधारणात्॥शिवलोकंप्रपद्येतकीटकेगर्द्दभोयथा॥नविभूतिर्यस्य
भालेनांगेरुद्राक्षधारणम्॥नशंभोर्भवनेपूजासविप्रःश्वपचाधमः॥त्र्य
रुद्राक्षधरोभूत्वायत्किंचित्कर्मवैदिकम्॥कुर्वन्विप्रस्तुमोहेननरकेपतति
ध्रुवम्॥तथाचपराशरे॥पापिष्ठानांमनुष्याणांखलुरुद्राक्षधारणे॥०
श्रद्धानजायतेसाक्षाद्दृढसिद्धेविमुक्तिदे॥लिंगपुराणे॥रुद्राक्षधारणेलज्जायेषा
षामस्तिमहामुने॥तेषांनास्तिविनिर्मोक्षःसंसाराज्जन्मकोटिभिः॥रुद्राक्षधा
रिणांदृष्ट्वापरिवादंकरोतियः॥उत्पन्नोतस्यसांकार्यमस्त्येवेतिविनिश्चयः॥स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्वाश्रमाएंगवर्णानांरुद्राक्षाणांचधारणम्॥कर्त्तव्यंमंत्रतःप्रोक्तंद्विजानांनान्य
वर्णिनाम्॥अभक्तोवासुभक्तोवानीचोनीचतरोपिवा॥रुद्राक्षान्धारयेद्य
स्तुमुच्यतेसर्वपातकैः॥तंनस्पृशंतिपापानितमांसीवविभावसुम्॥रुद्राक्ष
मालयामंत्रौप्तोनंतफलप्रदः॥रुद्राक्षंमस्तके धृत्वाजपेच्चसुसमाहितः॥
अरुद्राक्षोजपःपुंसांतावन्मात्रफलप्रदः॥यस्यांगेनास्तिरुद्राक्षएकोपि
वहुपुण्यप्रदः॥तस्यजन्मनिरर्थंस्यात्त्रिपुण्ड्ररहितंतथा॥रुद्राक्षंमस्तकेधृत्वा
शिरःस्नानंकरोतियः॥गंगास्नानफलंतस्यजायतेनात्रसंशयः॥भक्त्यासं

जं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूजितो नित्यं रुद्राक्षः शंकारात्मकः॥ दरिद्रं वापि कुरुते राजराजसमश्रियम्॥ रु
द्राक्षं शिरसाप्येकं धार्यं रुद्रपरैः सदा॥ ध्वंसनं सर्वदुःखानां सर्वपापविशोध
नम्॥ रुद्राक्षधारणं पुण्यं केन वा सदृशं भवेत्॥ महाव्रतमिदं प्राहुर्मुनय
स्तत्वदर्शिनः॥ रुद्राक्षं पूजयेद्यस्तु विना तोयाभिषेचनम्॥ तत्फलं लिंगपू
जायां तदेवाप्नोति निश्चितम्॥ अशुचिर्वाशुचिर्वापि सर्वावस्थांगतोपि वा॥ रु
द्राक्षमालाभरणः पवित्रो नात्र संशयः॥ रुद्राक्षधारणे लज्जा येषामस्ति स्व
भावतः॥ ते सर्वे जारजाः ते या अब्राह्मण्या स दैवतो॥ स्कांदे॥ रुद्राक्षं कंठमाश्रि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० त्यक्त्वानोपिम्रियंतेयदि॥पांतेरुद्रत्वमाप्नोतिकिंपुनर्मानुषादयः॥रुद्राक्षमालि
१५ कांकंठेधारयन्भक्तिवर्जितः॥पापकर्मापियोनित्यंरुद्रलोकेमहीयते॥रुद्रा
क्षधारणेलज्जायेषामस्तिमहामुने॥संकीर्णासाभवेद्दुह्मन्तेषांवंशपरं
परा॥शिवधर्मेवाशिष्टलैंगे॥रुद्राक्षधारणाद्देवरुद्रोरुद्रत्वमागतः॥मुन
यःसत्यसंकल्पाब्रह्माब्रह्मत्वमागतः॥रुद्राक्षधारिणेभक्त्यावस्त्रंधान्यंप्रददा
तियः॥सर्वपापविनिर्मुक्तःशिवलोकंसगच्छति॥रुद्राक्षधारिणंश्राद्धेभो
जयित्वानुमोदते॥पितृलोकमवाप्नोतिनात्रकार्याविचारणा॥रुद्राक्षधारि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुच्यते सर्वपापेभ्यो नात्र कार्या विचारणा॥ ३

गाः पादो प्रक्षाल्य यः पिबेन्नरः॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते॥ अ
न्नकूटं तुलाकूटं स्वर्णकूटं तथैव च॥ दुष्टचित्तस्त्रियं वाय संस्पर्शं च गुरुस्त्रिय
म्॥ आरभ्यैकमुखं नाव द्यावन्मुखानि षोडश॥ एतेषां द्वौ च विज्ञेयो श्रेष्ठो धा
रयंतु नरैः॥ रुद्राक्षो यं पंचमुखस्तथा चैकमुखस्मृतः॥ ये धारयंत्येकमुखं
रुद्राक्षं नित्यमेव हि॥ जिवन्मुक्ताश्च विज्ञेया नरास्तेनात्र संशयाः॥ ये रुद्राक्षं
पञ्चमुखं धारयंत्यनिशं नराः॥ पराशरोपपुरारो॥ महादेवश्च विष्णुश्च ब्र
ह्मा तेषां विभूतयः॥ देवाश्चान्ये तथा मत्याख्खलु रुद्राक्षधारिणः॥ गोत्र

जिवन्मुक्ताश्च विज्ञेया नरास्तेनात्र संशयाः २

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
२६

षेयश्चसर्वेषांकूटस्थाःप्रकलक्षिताः॥वेदोक्तवर्त्मनानित्यंखलुरुद्राक्षधारिणः
॥तेषांवंशप्रसूताश्चमुनयःसकलाअपि॥श्रौतधर्मपराशुद्धाःखलुरुद्राक्ष
धारिणः॥बहूनांजन्मनामंतेमहादेवप्रसादतः॥रुद्राक्षधारणेश्रद्धास्वभा
वेनैवजायते॥वेदवेदांतविज्ञानेवेदोक्तेचैवकर्मणि॥वेदानुसारिणिस्तोत्रे
श्रद्धापुण्येनजायते॥वेदमार्गेतरेमार्गेस्वतंत्रेपापकर्मणाम्॥नराणांजाय
तेवांछास्वभावेनैवसत्तम॥इतिरुद्राक्षमहात्म्यसमाप्तः॥अथरुद्राक्षधार
णविधी॥शिवपुराणे॥सूतउवाच॥सम्यक्पृष्टम्रषिश्रेष्टाःकथयामिपुरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तनम्॥रुद्रसंख्याशतंधृत्वारुद्ररूपोभवन्नरः॥एकादशशतानीहधृत्वायत्र
फलमाप्यते॥तत्फलंशक्यतेनैववक्तुंवर्षशतैरपि॥पञ्चभिश्चशतैश्चैवश मुकुटम्
तार्द्धेनाथवापुनः॥रचित्वामुकुटंयोवैधारयेत्सशिवस्तथा॥त्रिभिश्चैवशतैः उपवीतम्
प्रोक्तंषष्ट्यायुक्तैर्मुनीश्वराः॥उपवीतंतथातस्यत्रिराहृतंतथापुनः॥शिखायां शिखा
चतुष्पाप्रोक्तंत्रयंचऋषिसत्तमाः॥कर्णयोःपञ्चषट्चैवदक्षिणेतरयोस्तथा
॥शतमेकोत्तरंकंठेबाह्वोश्चरुद्रसंख्यया॥कर्णयोर्धारयन्नेत्रमणिबंधेतथापुनः
॥उपवीतेत्रयंधार्यंमुक्तिकामोभवन्नरः॥शेषाश्चोर्वरिताश्चैवपञ्चाशन्मुनिसत्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१७

माः॥कटिसूत्रंतथाकृत्वातानिभिश्चधारयेद्बुधः॥एवंसंख्याधृतायेनतद्रूपंरुद्रस
म्मतम्॥अथजाबालः॥शिखायामेकरुद्राक्षंत्रिंशतंशिरसावहेत्॥षट्त्रिंशतं
गलेदद्याद्बाह्वोःषोडशषोडश॥द्वादशंमणिबंधेपिस्कंधेपंचशतंवहेत्॥अ
ष्टोत्तरशतैर्मालामुपवीतंप्रकल्पयेत्॥द्विसरंत्रिसरंवापिसराणांपञ्चकंतुवा॥
सराणांसप्तकंवापिबिभृयात्कंठदेशतः॥इति॥अभावेतुसहस्रस्यबाह्वोःषोड
शषोडश॥एकंशिखायांकरयोर्द्वादशद्वादशैवतु॥द्वात्रिंशत्कंठदेशेतुचत्वारिं
शच्चमस्तके॥एकैककर्णयोःषट्कंवक्षस्यष्टोत्तरंशतम्॥योधारयतिरुद्राक्षान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुद्रवत्सोपिपूज्यते॥इतिमंत्राः॥शिरसीशानमंत्रेणकर्णेतत्पुरुषेणच॥अघो
रेणगलेधार्यंतेनैवहृदयेपिच॥अघोरबीजमंत्रेणकरयोर्धारयेत्सुधीः॥
इतिजाबालोपनिषदि॥तथाचोपवीतेधारणमुक्तंस्कांदे॥कंठेमूर्ध्न्युपवीतेच
करेवाहुयुगेथवा॥रुद्राक्षंधारयेन्नित्यंभक्त्यापरमयायुतेति॥
॥रुद्राक्षान्कंठदेशे३२दशनपरिमितान्मस्तकेविंशतीद्वे षट्षट्कर्ण
प्रदेशेकरकमलयुगेद्वादशद्वादशैव॥बाहोरिन्दोःकलाभिःपृथगपिचशिखा
सूत्रयोरेकमेकंवक्षस्यष्टाधिकंयःकलयतिशतकंसःस्वयंनीलकंठः॥श्रीशैव

इति१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुराणोईश्वरोक्तिः॥शिवरहस्येतृतीयांशे॥ब्राह्मणोपिचसर्वांगेधार्यंवैत्र्यंबकेण
नु॥अघोरेणैवमंत्रेणक्षत्रियोधारयेच्छुभान्॥वामदेवेतिमंत्रेणवैश्यैर्धार्याःस
दाक्षकाः॥शूद्रःशिवेतिनाम्नैवंधृत्वामुक्तोभविष्यति॥यतिसुप्रणवेनैवस्त्रीणां
पंचाक्षरेणतु॥सभर्तृकाकंठदेशेधृत्वैकंचाक्षमुत्तमम्॥पाकादिकरणेयो
ग्यारजसापिपरिप्लुता॥रत्नैःस्वर्णैर्नवाधार्योराजतेनाथवासदा॥सूत्रेणक्षो
मजेनापिसर्वैर्धार्योयथारुचिः॥एकाननःशिवःसाक्षाद्यंधृत्वाशिवभाग्भवे
त्॥द्विमुखंपार्वतीशंभुःतद्धृत्वापापमोचितः॥मुखंमुखेनसंयोज्यधार्यंरुद्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षमालिका॥नोचेत्स्वतपसांहानिर्भविष्यतिशिवाज्ञया इति॥शिवाराधनदीपि
कायाम्॥योधारयतिरुद्राक्षान्रुद्रवत्सोपिपूज्यते॥मुक्ताप्रवालस्फटिक
रौप्यवैडूर्यकाञ्चनैः॥समेतान्धारयेद्यस्तुरुद्राक्षान्सशिवोभवेत्॥के
वलानपिरुद्राक्षान्यद्यालस्याद्बिभर्त्तियः॥एकवक्त्राःपञ्चवक्त्राएकादश
मुखापरे॥चतुर्दशमुखाःकेचिद्रुद्राक्षालोकपूजिताः॥तथाचतत्रप्रमाणा
दिलिंगपुराणे॥धात्रीफलप्रमाणंयच्छ्रेष्ठमेकमुदाहृतम्॥बदरीफलमात्रं
तुप्रोच्यतेमध्यमंबुधैः॥अधमंचणमात्रंस्यात्प्रक्रियैषामयोदिता॥स्वयमे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१९

वकृतद्वारंरुद्राक्षंस्यादिहोत्तमम्॥यत्तुपौरुषयत्नेनकृतद्वारंतुमध्यमम्॥विपरी
तकृतद्वारमधमंतदुदाहृतम्॥त्रिंशतंत्वधमंपञ्चशतंमध्यममुच्यते॥सहस्र
मुत्तमंप्रोक्तमेवंभेदेनधारयेत्॥ताम्राःस्निग्धादृढाःस्थूलाःकंटकैःसंयुताः
शुभाः॥रुद्राक्षाणांशुभानांतुधारणेस्यान्महाफलम्॥कृमिदष्टंछिन्नभिन्नं
कंटकैर्हीनमेवच॥व्रणयुक्तमवृत्तंचषड्रुद्राक्षंविवर्जयेत्॥रुद्राक्षपरीक्षात
त्रैव॥निकषेहेमरेखाभायस्यलेखाप्रदृश्यते॥तदक्षमुत्तमंविद्यात्तद्धार्यं
शिवपूजने॥धारणेमंत्रविशेषाउक्ता॥लिंगपुराणे॥श्रीमत्पंचाक्षरेणैवप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णवेनापिवातथा॥ आत्ममंत्रेणमेधावीरुद्राक्षान्धारयेन्मुदा॥ मंत्रंविनाधारणे
प्रत्यवायःशिवरहस्ये॥ विनामंत्रेणयोधत्तेरुद्राक्षंभुविमानवः॥ सयातिनर
कंघोरंयावदिंद्राश्चतुर्दश॥ द्विजविषयः॥ रुद्राक्षधारिणांनियमोक्तस्तत्रैव॥ मद्यं
मांसंचलशुनंपलांडुंशिग्रुमेवच॥ श्लेष्मांतकाद्यविहितमक्षधारीविवर्जयेत्॥
अथमालादिग्रथनप्रतिष्ठादिप्रकारः॥ पुरश्चरणचंद्रिकायाम्॥ मणिमेकैकमा
दायसूत्रेवैयोजयेत्सुधीः॥ मुखेमुखंतुसंयोज्यपुच्छेपुच्छंतुयोजयेत्॥ गोपुच्छस
दृशीकार्यायद्वासर्पाकृतिःशुभा॥ तत्सजातीयमेकाक्षंमेरुमूर्ध्वमुखंन्यसेत्॥ र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
२०

कैकमणिमध्येतुब्रह्मग्रंथिंप्रकल्पयेत्॥जपमालांविधायेत्थंततःसंस्कारमाचरेत्
॥क्षालयेत्पञ्चगव्येनसद्योजातेनसज्जलैः॥चंदनागरुगंधाद्यैर्वामदेवेन
घर्षयेत्॥धूपयेत्तामघोरेणलिंपेत्तत्पुरुषेणतु॥मंत्रयेत्पञ्चमेनैवप्रत्येकंतु
शतंशतम्॥मेरुंतुपंचमेनैवततोमंत्रेणमंत्रयेत्॥संस्कृत्यैवंततोमालांतस्या
गंस्थापयेत्ततः॥अतःसकलमंत्राणांजपःकार्योनयास्रजा॥गुरुंसंपूज्यतत
स्तस्माद्गृह्णीयात्सर्वसिद्धये॥अंगुष्ठेनस्पृशेदेनांकरमध्यंगतां नकारयेत्॥अंगु
ष्ठस्यामक्षमालांचालयेन्मध्यमाग्रतः॥तर्जन्यानस्पृशेत्सोयंमुक्तिदोगणः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नकमः॥भुक्तौमुक्तौतथाकृष्टौमध्यमायांजपेत्सुधीः॥अंगुष्ठेनानामिकायां
तुजपेदुत्तमकर्मणि॥जपान्यकालेतांमालांपूजयित्वातुगोपयेत्॥गुरुंप्रका
शयेद्विद्वान्नतुमंत्रंकदाचन॥अक्षमालांचमुद्रांचगुरोरपिनदर्शयेत्॥भूत
राक्षसवेतालाःसिद्धगंधर्वचारणाः॥हरंतिप्रकटंयस्मात्तस्माद्गुप्तंजपेत्सुधीः
॥जीर्णेसूत्रेपुनःसूत्रंग्रथयित्वाशतंजपेत्॥यावन्निषिद्धसंस्पर्शेक्षालयित्वाय
थोचितम्॥प्रमादात्पतनेवापिशतमष्टोत्तरंजपेत्॥इतिमालाविधाननिरूपण
म्॥स्कांदे॥स्नानेदानेजपेहोमेवैश्वदेवेसुरार्चने॥प्रायश्चित्तेतथाश्राद्धेदीक्षाका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
२१

लेविशेषतः॥ब्राह्मणोविभृयात्श्वेतान्रक्तान्राजानुधारयेत्॥पीतान्वैश्य
स्तुविभृयात्कृष्णान्शूद्रस्तुधारयेदितिलैंगे॥इतिरुद्राक्षधारणविधीःस
माप्तः॥तथाचतंत्रचंद्रिकायाम्॥अनेनविधिनाकृत्वाभस्मस्नानादिकंसुधीः
॥स्वशाखोक्तेनमार्गेणकुर्यात्संध्यांसमाहितः॥शिवपूजामहात्म्यं॥शिव
रहस्ये॥किंवेदैःकिमुवाशास्त्रैःकिंवातीर्थादिसेवया॥शिवःसंपूज्यतांनित्य
मुपदेशोयमुत्तमः॥अयमेवपरोधर्मश्चीर्णमेतत्परंतपः॥इदमेवाखिलं
ज्ञानंपूजनंयन्महेशितुः॥किमन्यत्शास्त्रवाग्भाभिःसंक्षेपेणोपदृश्यते॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यापारान्सकलांत्यक्त्वापूजयध्वंमहेश्वरम्॥क्रियतांमद्वचःकरोशिवायात्मा
निवेश्यताम्॥आदिष्ठेभवनेकूपःखनितुंनैवदृश्यते॥सत्यंवच्मिहितंवच्मिसा
रंवच्मिपुनःपुनः॥असारेदग्धसंसारेसारंयच्छंभुपूजनम्॥शिवार्चनंपा
पहरंप्रक्षल्यजलेनवानूतनविल्वपत्रैः॥कृतंभवेन्नीरलवैश्चतेनकृतानिपु
रायान्यमितानिनूनम्॥अवश्यमेषाशिवलिंगपूजाकार्योमयाविल्वदलैर्ज
लैर्वा॥तयामयापापकुलानिनूनंविनाशनीयान्यनिशंसकृद्वा॥इतिनिश्चि
त्ययोनित्यंकरोतिशिवपूजनम्॥तस्यपापानिनश्यंतिकृतान्यपिविशेषतः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० लिंगार्चने भवेद्बुद्धिस्तेषामेवेह भास्कर॥ येषां पुनर्भवच्छेदं दक्षिकीर्षन्ति महेश्वरः॥
२२ विश्वावसु॥ अप्रमादेन कर्त्तव्यं श्रीमहादेवपूजनम्॥ स्वप्नेप्यन्यसुरार्चायामादर
स्याज्य एव हि॥ त्याज्यं सर्वात्मना त्याज्यं शिवान्यसुरपूजनम्॥ स्वप्नेपि शिवपूजे
व कर्त्तव्याति प्रयत्नतः॥ अशिवानि भविष्यन्ति शिवान्यसुरपूजनात्॥ अतस्त
नैव कर्त्तव्यं न कर्त्तव्यं कदाचन॥ सायंकाले च यत्नेन स्थावरं लिंगमादरात्॥ पूज
नीयं विल्वपत्रैरभिषेकपुरःसरम्॥ न यत्र स्थावरं लिंगं न तत्रैकं दिनं वसेत्॥ उषित्वो
पोषरां कृत्वा पंचगव्येन शुध्यति॥ शिवलिंगविहीने तु न गंतव्यं वहिर्द्विजैः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवलिंगंसमादायगंतव्यंयत्रकुत्रचित्॥शिवलिंगानर्पितान्नेनभोक्तव्यंकदा
चन॥शिवलिंगमनभ्यर्च्यनपेयमुदकंद्विजैः॥शिवलिंगार्चनंपुण्यंश्रो
तंयत्रकचित्कृतम्॥तत्कृतंचेच्छिवक्षेत्रेकिंवक्तव्यंवदस्वमे॥शिवलिंगा
र्चनेनैवमुक्तिर्भवतिनान्यथा॥तस्मात्प्रयत्नतःकार्यंनित्यंशंकरपूजनम्॥
नार्मदंस्थावरंलिंगंयदिस्थूलतरंभवेत्॥तत्रपूजाप्रयत्नेनकर्त्तव्याप्रतिवासर
म्॥अनार्मदंनार्मदंवाचरंलिंगमनुत्तमम्॥पूजनीयंप्रयत्नेनसर्वकालेषु
सादरम्॥स्थूलंयन्नार्मदंलिंगंतत्तुकालत्रयेद्विजैः॥पूजनीयंविल्वपत्रैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३

शिव० २३

पुष्पैश्चविविधैर्नैवेः॥ चुलकं जलमात्रं वा त्रुटितं विल्वजं दलम्॥ योदत्तेनियमेनासौ तस्मै दत्ते जगत्त्रयम्॥ शिवरहस्ये त्रतीयांशे॥ नान्यदेवैः समंशंभुं पूजयेद्विश्वनायकम्॥ पशवो ब्रह्मविष्ण्वाद्यास्तैः समं पतिपूजनम्॥ नकार्येसर्वथा शैवैर्नेप्रसादकरंहितन्॥ सहाह्वानार्चनं शंभोर्नैवकुर्यात्सुरांतरैः॥ नरकावहमेतत्स्यान्नात्रकार्या विचारणा॥ तस्मात्संपूजयेत्सांगं लिंगमेव पिनाकिनः॥ लिंगे यदल्पं फलमंबु वान्यद्दत्तं तदेवामितपुण्यहेतुः नतेन तुल्यं जगतीतलेस्मिन्नशुभावहं पापविनाशहेतु॥ एकं नवं विल्व

दलंशिवायसमर्पितंतनुलनांश्रयाति॥धर्मोपिकोवानदुमासहायस्वरूपदानेपि
समर्थमेव॥यद्यदिष्टतमंलोकेतत्तद्दास्यतिशंकरः॥रंकेभ्योप्यत्रविल्वेनज
लेनापिसमर्चितः॥सर्वंपरित्यज्यरवेयोलिंगंशरणंगतः॥नतंपापानिवाधं
तेमहांत्यपिदिवाकरेति॥लिंगपुराणे॥तुंगलिंगार्चनेप्रीतिर्यथाममसदात
था॥प्रीतिस्तुनभवत्येववेदपारायणेरपि॥सत्यंसत्यमिहोच्यतेसुरगणाःस
त्यंपुनःसर्वपापघ्नंसाग्रभुजद्वयंशपथमप्यंवापदांभोरुहम्॥कृत्वाशंकरचा
रुचारुचरणांभोजेपिलिंगार्चनम्॥सर्वाभीष्टदमेवतेनसदृशंपुराणंन...लो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
२४
कत्रये॥का॰शिखरांडे॥ त्रैलोक्येश्वर्यसंपत्तिर्मयाप्राप्तासहस्रगो॥शिवलिंगार्चनादे
कात्सत्यंसत्यंनसंशयः॥शिवरहस्येतृतीयांशे॥शिव॰ लिंगार्चनेनैवशिवस्तु
ष्यतिनान्यथा॥अन्येपिवहवोधर्माःशिवःप्रोक्ताःप्रसाददाः॥साक्षात्प्रसा
दजनकंशिवलिंगार्चनंद्विज॥अन्येपिशैवधर्मायेवह्वायासार्थनाशकाः
योग्य॰ ॥करोतुवायथाजोषंनैतत्त्याज्यंकदापिच॥पंचाक्षरेणयोलिंगंविल्वैरर्चति
शूलिनः॥पञ्चत्वंनाप्नुयाज्जातुपञ्चपापैःप्रमुच्यते॥शिवपूजांसदाकुर्याद्बु
द्धिमानिहमानवः॥अशक्तश्चेत्तरकृतांपूजांपश्येद्भक्तिविनम्रधीः॥अश्रद्ध
यापियःकुर्यात्तशिवपूजांविमुक्तिदाम्॥पश्येद्वासोपिकालेनप्रयातिपरमं१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दम्॥ब्रह्महत्यादिपापानियथानरकसाधनम्॥शिवलिंगान्यपूजापितथा
नरकसाधनम्॥अज्ञात्वातुविधिंयस्तुकरोतिशिवपूजनम्॥तत्कामदंभवत्येवत्वा
तंचैवकिंवदाधुना॥संसारपाशसंबद्धस्तावद्भवतिमानवः॥नयावद्भजतिप्रीत्यादेव
देवंमहेश्वरम्॥महेशाराधनादन्यन्नास्तिसर्वार्थदायकम्॥अतःसदासावधा
नंपूजनीयोमहेश्वरः॥अथपुरुषार्थप्रबोधेलिख्यते॥लिंगस्यदर्शनादेवस्प
र्शनेनापिकिंफलम्॥लिंगस्यदर्शनात्पापंक्षयंगच्छतिवैप्रिये॥स्पर्शेचैवस
दालिंगेगाणापत्यंलभेन्नरः॥अर्चितंभक्तिभावेनदद्यान्मोक्षंनसंशयः॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
२५

तथा च सारसंग्रहे दीण॥ न लिंगाराधनादन्यत्तुरायं वेदचतुष्टये॥ संसारांबुधि
मग्नानां नान्यत्तरणसाधनम्॥ विद्यते सर्वशास्त्राणामेष एव विनिश्चयः॥१०
अज्ञानतिमिरांधानां विषयासक्तचेतसाम्॥ प्लवो नान्योस्ति जगति लिंगा
राधनमंतरा॥ सर्वमन्यत्परित्यज्य कर्मजालमशेषतः॥ भक्त्या परमया
विद्वान् लिंगमेकं प्रपूजयेत्॥ एकतः सर्वदानानि व्रतानि विविधानि च॥
तीर्थानि नियमा यज्ञा लिंगार्चा चैकतः स्मृता॥ ब्रह्मादयः सुराः सर्वे मुनयो
यक्षराक्षसाः॥ गंधर्वाश्चारणाः सिद्धा दैतेया दानवास्तथा॥ पूजयित्वा महा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भक्त्यालिंगंसर्वार्थसिद्धिदम्॥प्राप्नाःकामानभीष्टांश्चतांस्तान्सर्वजनप्रि
यान्॥ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाप्यनुलोमजः॥पूजयेत्सततंलिंगंत
त्तन्मंत्रेणसादरम्॥भुक्तिमुक्तिप्रदंलिंगंविविधापन्निवारणम्॥पूजयि
त्वानरोनित्यंशिवसायुज्यमाप्नुयात्॥कलौलिंगार्चनंश्रेष्ठंयथालोकेप्रदृश्यते॥०
तथान्यन्नास्तिनास्तीतिशास्त्राणामेषनिश्चयः॥अप्रकरणेप्रत्यवायश्चतत्रै
व॥विनालिंगार्चनंयस्यकालोगच्छतिनित्यशः॥महाहानिर्भवेत्तस्यदु
र्वृत्तस्यदुरात्मनः॥प्रदोषकालपूजामाहात्म्यंलिख्यते॥ब्रह्मोत्तरखंडे॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
२६

अतः प्रदोषे शिव एक एव पूज्योऽथ नान्ये हरिपद्मजाद्याः॥ तस्मिन्महेशे विधिनेज्यमाने सर्वे प्रसीदंति सुराधिनाथाः॥ शिवरहस्ये॥ आजन्मार्जितकंठशोषरणकरैः किं वेदपारायणैः॥ किं दानैर्धनधान्यनाशनकरैः कन्याप्रदानैरपि॥ किं गोतुंगतुरंगदंतिनिकरालब्धप्रदानैः शिवे॥ सायंकालशिवार्चनार्जितफलाभावेन मुक्तिर्यतः॥१॥ क्षीणास्यात्तनुरेव घोरतपसा दानैर्धनं नश्यति व्यर्थं चायुरपि प्रयाति गिरिजे लिंगार्चनं तन्न चेत्॥ तेनैवाखिलभाग्यभोगविभवे भूमंडले जायते॥ पश्चान्मुक्तिरपीति तेन सदृशं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धर्मंनजानेध्रुवम्॥२॥स्वर्गःकेवलमंगजातसहिताद्यानात्सनव्यंगतोव्यंगंलिं
गसमर्चनंजललवैर्विल्वीदलैर्वाकृतम्॥तेनापारसुरानतोतिविभवःस्वर्गा
पवर्गप्रदंलिंगाराधनमेवतेनसदृशोधर्मोनलोकत्रये॥३॥चित्तंयस्यन
लिंगपूजनरतंतज्जन्मतावद्धतंव्यर्थंतज्जननीवयस्तरुवरछेदेकुठारःस
तु॥तद्वार्तोप्यघसाधनायगिरिजेलिंगार्चनाराधकोयस्तस्यानुचरोपिसो
पिसुमाहान्‌कालाद्भयंतस्यन॥तज्जन्मातिमनोहरंसुखकरंमन्येतिमान्येशि
वेयःसायंशिवपूजनोद्यतमतिमध्याह्नकालेप्रगे॥तंदृष्ट्वापियमादयोपिवहुधा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
२७

कंपायमानासदाधन्यातज्जननीपितापिसुतरांधन्यःसमान्यःसुरैः॥पुण्यापुण्य
नंतान्यपिकिंशिवेतैःप्रदोषकालेशिवदर्शनेनन॥भवन्त्यवश्यंनृपतत्त्ववेत्तासौ
भाग्यसौंदर्यनिधिश्चमर्त्यः॥किंकौतुकंस्वच्छमिदंशिवेनदृष्टंप्रदोषेशिवलिं
गमात्रम्॥सुतेसुखानिस्वयमेकमेवनान्यत्परंकिंचिदपेक्षितंच॥प्रदोषका
लेशिवसंमतोयःप्रदोषकालीनशिवार्चनेनन॥प्रयान्तिशैवंपदमद्भुतंनरनरा
यतेभूपसुरादिभिश्च॥यःकोपिसायंशिवदर्शनेनभुक्त्वापिभोगान्विपुला
नपारान्॥शिवंप्रयात्येवविनाप्रयत्नैःसयोगिनामप्यतिदुर्लभोहि॥सयोग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वार्त्तां न करोति शंभुर्नैयाग वार्त्तामपि दानवार्त्ताम्॥ परं तु सायं शिवपूजकानां
करोति वार्त्तां गिरिजासमेतः॥ प्रदोषकाले समुपागतो यः पुष्पं गृहीत्वा क
मलं गृहीत्वा॥ स विल्वमादाय जलं गृहीत्वा सभूतिमादाय तिलाक्षतादीन्
॥ सभूतिमादाय स सायमादौ लिंगार्चनासक्तमतिर्भवानी॥ निरीक्षितं ते
न महाप्रदोषे विल्वार्चितं लिंगमनुत्तमं मे॥ शैवधर्मे श्रीकृष्ण उवाच॥ शि
वः प्रदक्षिणो मर्त्यः सोमसूत्रं न लंघयेत्॥ लंघनेन्वेकमेकं स्यादलंघ्यमयुत
त्रयम्॥ एककालं द्विकालं वा त्रिकाल[illegible]मपि नित्यशः॥ शिवदर्शनमात्रेण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पातकैःपरिमुच्यते॥वृषस्यवृषणांस्पृष्ट्वा शृंगमध्येपिनाकिनम्॥दृष्ट्वामात्रे
नरोयातिकैलासेशिवसन्निधिम्॥मृदंगगीतवाद्यैश्चघंटाकाहलशंखकैः॥
देवंमांसेवयेद्यस्तुसमुक्तोनात्रसंशयः॥स्कांदे॥सांतंयांतंत्रिवारंप्रणवक
सहितंयोब्रवीतिप्रदोषेपश्यन्देवेशलिंगंवृषवृषणकरः शृंगमध्येनदृ
ग्भ्यांसर्वेवेदाअधीताःक्रमपदसहितामंत्रकोट्यश्चजप्तास्त्रैलोक्यंतस्यव ल्ये
श्यंभवतिहिसविनिर्धूतपापोनवंद्यः॥ब्रह्मांडाख्येपुराणेतुप्रदोषेहरिदर्श
नम्॥प्रतिषिद्धंतथान्यत्रत्रयोदश्यांविशेषतः॥नप्रदोषेहरिंपश्येत्त्रयोद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्यामतत्क्रियः॥यदिपश्येपत्रहृतिर्नश्येद्द्वादशाब्दनतिक्षतिः॥अर्चनंवासुदेवस्य
वंदनंस्मरणंतथा॥नकुर्यात्कीर्तनंचापिप्रदोषेभक्तिमान्नरः॥होमंजपंच
स्वाध्यायमभ्यंगंहरिदर्शनम्॥भोजनंमैथुनंपानंप्रदोषेषट्‌वर्जयेत्
॥शिवरहस्ये॥सभूतिमादायसमागतोयःप्रदीपंगृहीत्वातुफलंगृहीत्वा
॥तांबूलमादायससायमादौलिंगार्चनासक्तमतिर्भवानी॥प्रदक्षिणे
नप्रणतंचतेनध्यातंचतेनक्षणमास्तिकेन॥विभूतिपूतेनविलोकितंचे
त्पुनःपुनर्लिंगमनुस्मृतंच॥रुद्राक्षमालाच्छविभूषणेनपुनःपुनस्तत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
२८

राणंतंचलिंगम्॥ तांबूलमादायनिवेदितंचद्राक्षाफलंतेननिवेदितंच तेना
र्पितानितत्कदलीफलानिप्रदोषकालेशिवलिंगमूर्द्धि॥ तेनाम्रपक्वोरु
फलानितानिदत्तानिलिंगोपरितेनदत्तम्॥ दुकूलमत्युज्वलमायतंच
तदेवतावद्विपुलंमनोरम्यं॥ क्षीरप्रवाहैरभिषिक्तमद्यप्रदोषकालेसुदधिप्र
वाहैः॥ घृतप्रवाहैश्चमधुप्रवाहैःसुशर्कराराशिभिरर्चितंच॥ मंदारमाला
समलंकृतंचलिंगंमदीयंघनचन्दनेन॥ कस्तूरिकाकर्दमसंयुतेनप्रदो
षकालेखलुशाम्भवेन॥ अनेनरत्नाभरणानिदत्तान्यनेनदत्ताखलुवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ल्वमाला॥ प्रदोषकाले मुहुरादरेण स्पृष्टं च लिंगं मम शाम्भवेन॥ अयं च हस्तो भगवानयं मे पुण्यस्वभावो भगवत्तरो मे॥ अयं हि हस्तः खलु भेषजो यं यस्मादयं मे ध्यशिवाभिमर्शनः॥ अनेन भुक्तं न दिवा भवानि जलं न पीतं फलभक्षणं च कृतं न तांबूलमपि प्रदोषे त्यक्त्वा शिवाराधनमादरेण॥ एते मदीयाः सितभस्मपूताः प्रदोषकाले शिवपूजनाय॥ आम्रैरभ्यर्च्य देवेशमश्वमेधफलं लभेत्॥ शिवगीतायाम्॥ स्थण्डिले वा ● जले वह्नौ वाय्वाकाश एव वा॥ गिरौ स्वात्मनि वा यो मां पूजयेत्प्रयतो नरः॥ सकृत्स्नफ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
३०

लमाप्नोतिलवमात्रेणराघव॥आत्मपूजासमानास्तिपूजारघुकुलोद्भव॥विल्वद्
क्षेतत्फलेवायोमांपूजयतेनरः॥परांश्रियमिहप्राप्यममलोकमहीयते॥ब्रह्मणःस्
ष्टिकर्तृत्वंविष्णोर्दानवमर्दनम्॥स्वर्गाधिपत्यमिन्द्रस्यशिवपूजाविधेःफलम्॥
किमश्वमेधादिकयागवृन्दैर्नरस्ततःशिवाराधपुण्यराशेः॥लेशोस्तियःसूक्ष्म
तरोनितांतंतेनापितुल्यानभवंतितेतु॥सकीलाललवेनापिकालकालःसम
र्चितः॥ददातिभुक्तिमुक्तिञ्चकिंपुनःकुसुमार्चितः॥करोतिकौतुकंलोकेस
गौरीकामुकःखलु॥छिन्नपत्रार्पणेनापितुष्टोमुक्तिंप्रयच्छति॥गोकोटिदाने

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रपिकिंफलस्यात्ऋतैःशिवाराधनपुण्यराशेः॥ लेशोस्तियःसूक्ष्मतरोनि
तांतंतेनापितुल्यानभवंतितेतु॥ किमुतमाष्वार्बुददानसंघैन॥६इतिशि
वरहस्ये॥ पूजामहात्म्यसमाप्ताः॥ शिवपूजाविधि स्कंदेसूतसंहितायाम्
॥ सूतउवाच॥ वक्ष्येपूजाविधिंविप्राःभ्रराध्यंमुक्तिमुक्तिदम्॥ श्रुतिस्मृत्यु
दितंकर्मकृत्वाश्रद्धापुरःसरम्॥ स्नात्वाशुद्धेसमेदेशेगोमयेनोपलेपिते
॥ आसीनःसर्वदामौनीनिश्चलोदङ्मुखःसुधीः॥ विचित्रमासनंतत्रनि
धायब्रह्मवित्तमाः॥ आगस्त्येनचशास्त्रेणप्रोक्तलक्षणलक्षितम्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आदाय श्रद्धया विप्राः शिवलिंगं समाहितः॥ तत्रैवावाह्य देवेशं प्रणवेन हृदि
स्थितम्॥ अर्घ्यं दत्वा मुनिश्रेष्ठ ततः पूर्वोक्तमंत्रतः॥ पाद्यमाचमनं चैव
दत्वा पूर्वोक्तमंत्रतः॥ स्नापयित्वा महादेवमापोहिष्ठादिभिस्त्रिभिः॥ त
था पुरुषसूक्तेन श्रीमत्पंचाक्षरेण च॥ पुनराचमनं दत्वा प्रतिष्ठाप्यासने
हरम्॥ दत्वा वस्त्रं मुनिश्रेष्ठाः प्रणवेन समाहितः॥ उपवीतं पुनर्दत्वा भूष
णानि च सादरम्॥ गंधं पुष्पं तथा धूपं दीपं चैवादरेण च॥ श्रीमत्पंचाक्ष
रेणैव प्रणवेन युतेन च॥ हविर्निवेद्य देवाय पानीयं सहादरात्॥ पुनराचम
न

नंदत्वाताम्बूलंचोपदंशकम्॥माल्यंदत्वानुलेपंचप्रणाम्यभुविदण्डवत्॥लौ
किकैर्वैदिकैःस्तोत्रैःस्तुत्वाहृदिविसर्जयेत्॥प्रणवेनमहादेवंसर्वज्ञंसर्वकार
णम्॥ब्रह्मचारीगृहस्थश्चवानप्रस्थश्चसुव्रताः॥एवंदिनेदिनेदेवंपूजये
द्वंविकापतिम्॥सन्यासीदेवदेवेशंप्रणवेनैवपूजयेत्॥नमोंतेनशिवेनैवस्त्री
णांपूजाविधीयते॥विरक्तानांतुशूद्राणामेवंपूजाप्रकीर्त्तिता॥अन्येषामपि
सर्वेषांनराणांमुनिपुंगवाः॥पूजांदेवालयेदृष्ट्वाप्रणामस्तस्यकीर्त्तितः
॥दिपिकायाम्॥अथपार्थिवपूजाविधानम्॥तत्रपूजाप्रदेशाः॥नदीतीरे

या

शिव०
२२

तडागेवापर्वतेषुगुहेषुवा॥शिवालयेषुचोद्देशेपार्थिवार्चाविधीयते॥वर्ण
विशेषेमृद्विशेषः॥विप्रेगौरास्मृताशोणावाहुजेपीतवर्णका॥वैश्येकृष्णा
समाख्यातापादजेवायत्रवाभवेत्॥साम्नाद्यामृत्तिकालिंगनिर्माणाय
प्रयत्नतः॥मृद्विशेषफलविशेषः॥श्वेतालक्ष्मीप्रदाचैवगौरीराज्यप्रदाभ
वेत्॥रक्तयाश्रियमाप्नोतिकृष्णावैरिविनाशिनी॥पुत्रकामाप्रदामिश्रावालु
कामोक्षदायिनी॥वर्ज्यमृत्तिका॥श्मशानेमृतभूमौचनीलाशरासमुद्भवे॥
ऊखरेग्रामपार्श्वेचदुष्टकर्मस्थलेपिच॥मद्यागरेवृक्षमूलेविभीदकतले

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थितामृ॥मृत्तिकांवर्जयेतत्रप्रासोत्थमुद्भवांयतः भूमिजामृ॥ग्राह्यमृत्तिका॥
गंगादितीरसंभूतासिद्धक्षेत्रसमुद्भवा॥पवित्रपर्वतारण्यसंभवामृत्तिकाशु
भा॥अथपार्थिवपूजाविधिःशिवागमे॥पार्वत्युवाच॥धर्मादानान्यनेकानि
तपस्तीर्थान्यनेकशः॥विद्यंतेजगदाधारप्रत्ययोनास्तिमेप्रभो॥ततोब्रूहिमहा
देवसद्यःप्रत्ययकारकम्॥विचार्यकिंचिद्यत्कृत्वाकृतकृत्योभवेन्नरः॥शंकरउ
वाच॥कुमारायपुराख्यातंसद्यःप्रत्ययकारकम्॥तदद्भुतंतेप्रवक्ष्यामियतस्त्वंव
ल्लभामम॥अथवैदिकभक्तानांपार्थिवार्चानिगद्यते॥यथोक्तंविधिनास

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
३३

म्यक्संपूर्णफलसिद्धये॥शुभेह्निप्रातरुत्थायशिवंध्यात्वासमाहितः॥गत्वोदग्वि
दिशंदेविमंत्रविन्मंत्रमुत्तमम्॥नमोगरोभ्यइत्येतंप्रजपन्निश्चलांतरः॥शुद्धप्र
देशसंभूतांमृदमादाययत्नतः॥येपप्यामितिचानीयजपन्मंत्रमुदारधीः॥संशो
ध्यचजलेनाशुपिंडीकृत्वाशनैःशनैः॥पवित्रेदेशेसंस्थाप्यततःस्नायाद्विधा
नतः॥नित्यनैमित्तिकंकर्मविधायसकलंपुमान्॥प्रकुर्न्यासंततःकुर्यान्मंत्रैरे
तैःसमाहितः॥ललाटेतुशिवःप्रोक्तोकंठेरुद्रःसमीरितः॥ईशानोनाभिदेशेतु
जान्वोःशंकरएवच॥सर्वव्यापीगुल्फयोश्चपादयोस्तुसदाशिवः॥एवंन्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संपुटांकृत्वाध्यायेद्देवंमहेश्वरम्॥स्थितंकल्पतरोर्मूलेस्त्रानमुद्रालसत्कर
म्॥पद्मासनसमासीनंयोगपट्टविराजितम्॥मंगलायतनंदेवंमनोहरतरा
कृतिम्॥उमयोपासितंश्रीमच्चंद्रशेखरमुज्वलम्॥ततोध्यायेत्सहस्राराास
हस्रशइतीरयन्॥एवंध्यात्वासुधीःकुर्यात्पंचाष्टैकादशाथवा॥लिंगानि
मंत्रमुच्चार्यरुद्रेभ्योयेदिवीतिच॥मानस्तोकेतिसंप्रोक्ष्यवारिणावाहनंच
रेत्॥ॐनमःप्रथमंब्रूयात्भगवत्येततोवदेत्॥शिवपत्न्यैततोनेनवामेदे
वींनियोजयेत्॥येपथिव्याइतिपठन्नासनादिप्रकल्पयेत्॥हिरण्यवाह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰ देवसंवृभूषणांशंभवायच॥ ध॰ क्षमवेचोत्तरीयंचकिरीकेभ्योपवीतकम्॥ गं
३४ धंदद्यान्नमःश्वभ्यःपुष्पंपार्यायमंत्रतः॥ नमःकपर्दिनेधूपंप्रदीपंनमआ
शवे॥ वत्स्लशायचनैवेद्यंपर्णायपर्णपूगकम्॥ आरात्रिकंचतेजोसीत्ये
षातेचप्रदक्षिणाम्॥ नमस्त्वितिनमस्कारस्यवरुद्रार्चनेविधिः॥ अथवा
न्यप्रकारेणपार्थिवार्चाविधीयते॥ अथातःसंप्रवक्ष्यामिशृणुब्रह्मनप्र
यत्नतः॥ पूजाविधिरहस्यंतुशंभुनाकथितंपुरा॥ त्रिपुण्ड्रतिलकंकृत्वा
भस्मरुद्राक्षचंदनैरपि॥ व्याघ्रचर्मोत्तरीयस्तुपूजांशैवींसमाचरेत्॥ हरो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महेश्वरः शम्भुः शूलपाणिपिनाकधृक्॥ शिवः पशुपतिश्चैव महादेवः
ति क्रमात्॥ मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च॥ स्नपनं पूजनं चैव
क्षमापनविसर्जने॥ ॐकाराद्यैश्चतुर्थ्यंतैर्नमोंतैर्नामभिः क्रमात्
॥ कर्त्तव्यास्तत्क्रियाः सर्वा भक्त्या परमया सदा॥ अथ ध्यानं प्रवक्ष्यामि
सर्वसिद्धिप्रदायकम्॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम्॥ पद्मासीनं समंतात्स्तु
तममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ३५

त्रिनेत्रम्॥ध्यात्वाप्राणप्रतिष्ठांतुकृत्वापूजांसमाचरेत्॥पूर्वाद्याग्नेयपर्यंतंवा
मावर्तेनवुद्धिमान्॥अष्टमूर्त्यंतकेरष्टनामभिस्तुसमाचरेत्॥पूजामावरणा
ख्यांतुप्रणवाद्यैर्नमोंतकैः॥शर्वायक्षितिरूपायभवायजलमूर्त्तये॥रुद्राय
वह्निरूपायतथोग्रायसमीरये॥वायुरूपायभीमायतथाकाशस्वरूपि
णे॥महादेवायसोमायईशानायार्कमूर्त्तये॥यजमानस्वरूपायपशूनां
पतयेनमः॥मध्येसदाशिवायाथकथयेत्सर्वमूर्त्तये॥यद्वाप्रासादवीजे
नमूलमंत्रेणवासुधीः॥कुर्यात्तुपार्थिवींपूजामितिकेश्चिदुदीर्यते॥तत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तुतर्पणंकार्यंशिवमंत्रैःपृथकपृथक्॥शिवंभवंतथाशिवाद्यैर्नामभिरि
तिवापाठः॥योग्नंमृडंशर्वंतथैवचशशिशेखरंसंहरंचशंकरंचविरूपकम्॥न
वमंविश्वरूपंचदशमंचकपर्दिनम्॥त्र्यंबकेतर्पयामीतिप्रणवाद्यैश्चतर्प
येत्॥एवंसपूज्यमतिमाननुपचारैःक्षमापयेत्॥पार्वतीवल्लभंस्तुत्वास्तोत्रे
णानेनभक्तितः॥ईश्वरउवाच॥नमओंकाररूपायनमोक्षरवपुर्धते॥न
मोनादात्मनेतुभ्यंनमोविंदुकलात्मने॥अलिंगलिंगरूपायरूपातीता
यतेनमः॥त्वंमातासर्वलोकानांत्वमेवजगतःपिता॥त्वंभ्रातात्वंसु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
३६

ह्न्मित्रस्त्वंब्रियस्त्वंपितामहः॥नमस्तेभगवान्नाथमास्करामिततेजसे॥
नमोभवायदेवायरसायांबुमयायच॥शर्वायक्षितिरूपायसदासुरभि
रूपिणे॥पशूनांपतयेतुभ्यंपावकामिततेजसे॥भिमायव्योमरूपाययशो
रूपायतेनमः॥महादेवायसोमायचामृतायनमोस्तुते॥उग्राययजमाना
यनमस्तेकर्मयोगिने॥इतितत्त्वप्रकाशेनस्तोत्रेणानेनशंकरः॥संस्तुतः
पार्वतीनाथःस्वात्मानमपिदयच्छति॥इदंदेविमयाप्रोक्तंस्तोत्रंशंकरवल्ल
भम्॥धन्यंयशस्यमायुष्यंस्वर्गदंचापवर्गदम्॥पार्थिवानांचलिंगा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नायन्मयापूजनंकृतम्॥तेनमेभगवान्रुद्रोवांछितार्थंप्रयच्छतु॥इतिस्तुत्वा
तुसंप्रार्थ्यप्रणिपत्यविसर्जयेत्॥एवंवत्सरपर्यंतंनित्यंवाहंतमाचरेत्॥इदं
स्वकाममुद्दिश्ययःकश्चित्कुरुतेव्रतम्॥सोपिकामानवाप्नोतिसत्यंसत्यंवरा
नने॥इष्टान्कामानवाप्नोतिक्रियमाणंविलोकयन्॥यःपुनःक्रियतेभ
क्त्यासप्राप्नोतीप्सितंफलम्॥नयज्ञास्तादृशादेविनतीर्थंदानमेवच॥य
थातुपार्थिवीपूजासद्यःप्रत्ययकारिका॥नसंपद्विलयस्तस्यतथासौख्यं
चनित्यशः॥इतिकृत्वाव्रतंदेविसर्वान्कामानवाप्नुयात्॥इतिशिवाग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० २७

मे पार्थिवपूजाविधानम्॥ अथ च द्रव्याभावे॥ प्रणवाभं त्रमुच्चार्य देयं जल
मनुत्तमम्॥ द्रव्याभावे प्रदातव्याः क्षालितास्तंडुलाः शुभा इति शिवरहस्ये
स्त्रीविषयः तत्रैव॥ स्पर्शः पार्थिवलिंगस्य बाणलिंगस्य चादरात्॥ स्त्री
भिः कार्यः स्थावरस्य लिंगस्य तु न सर्वथा॥ विहितश्चररलिंगेषु स्पर्शः स्त्री
णां प्रयत्नतः॥ न स्थावरेषु लिंगेषु सत्यमेतन्मयोच्यते॥ स्थावरेषु तु
लिंगेषु यत्र दिव्यं भविष्यति॥ तत्र पर्वणि कर्त्तव्यं स्पर्शनं स्त्रीभिरादरा
त्॥ स्त्रीभिः स्पर्शोऽपि कर्त्तव्यः पञ्चाक्षरपुरःसरम्॥ पूजाप्यन्या यथा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योग्यं पञ्चाक्षरपुरस्सरम्॥शावाशौचेपि कर्त्तव्यं विनास्पर्शं शिवार्चनम्॥ज
न्माशौचेप्येवमेवं कर्त्तव्यं शंकरार्चनम्॥शिवलिंगस्पर्शमात्रं न कार्यं सूत
कद्वये॥शंकरार्चनकालेतु द्विजोनाशौचदोषभाक्॥एवं श्रोताग्निहोमे
पि द्विजोनाशौचदोषभाक्॥तथाप्यत्र विशेषोस्ति शिवलिंगार्चने शुभे
॥अग्नौस्पर्शस्तदाकार्यः शिवलिंगेतु न ध्रुवम्॥अस्पर्शदोषनाशार्थं
सूतकान्ते प्रयत्नतः॥रौद्रेण चरुणाकार्योहोमोरौद्रैः सहस्रकम्॥प्रसवोजा
यतेयस्यास्तयातु शिवपूजनम्॥कर्त्तव्यं मानसं नित्यं दशाहांतं यथाक्रमम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
३८

दशाहे समतीते तु कृत्वा स्नानं यथाविधि ॥ शिवलिंगार्चनं कार्यं द्विजस्त्रीभिर्द्वि
जैरिव ॥ होमो यं पुरुषाणां तु स्त्रीणां तु न कदाचन ॥ होमे तु नयनस्तासाम
धिकारः श्रुतिश्रुतः ॥ सूतकान्ते तु कर्तव्यं स्त्रीभिरीशादिनार्चनम् ॥ द्विजो वा
द्विजनारी वाप्यकृत्वा शंकरपूजनम् ॥ यदि भुंक्ते तदा योनिं चाण्डालीं प्राप्य
ते ध्रुवम् ॥ पुरुषार्थे प्रबोधे ॥ सूतके मृतके स्त्रीणां रजसो दर्शने पि चादे
वपूजा न कर्तव्या मानसा भ्रान्तिं विना ॥ अप्रतिष्ठित लिंगादिपूजकस्त्री
श्वरार्चनम् ॥ नित्यमाचौच मध्येन कारयन्परहस्ततः ॥ सुप्रतिष्ठित लिंगा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिपूजकस्त्वीश्वरार्चनम्॥सुधर्मिहः स्ततोनित्यंकारयेन्मतिमत्तमः॥उभाभ्यांसू
तकाद्यनेकार्यंलुप्तंसुरार्चनम्॥अन्यथाकुपितौस्यातांपार्वतीपरमेश्वरौ॥शि
वरहस्ये॥श्रौतकर्मपरित्यागः सूतकेपिनसर्वथा॥श्रौतकर्मणितत्कालेस्ना
तश्शुद्धिमवाप्नुयात्॥कदापिनपरित्याज्यंश्रौतकर्मशिवार्चनम्॥यावज्जी
वश्रुतिस्तत्रप्रवलंतन्नसूतकम्॥दर्शस्यपौर्णमासस्यशिवलिंगार्चनस्य
च॥प्रमादात्सूतकेत्यागंकुर्वन्नरकमश्नुते॥दशाहेसमतीतेतुद्विजैस्त्वयंवक
श्वरः॥कर्त्तव्योतिप्रयत्नेनसतिलोगोघृतान्वितः॥होमःकार्यःप्रयत्नेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ३९

सहस्रंहविषाद्विजैः॥सूतकेशिवलिंगस्यजातमस्पर्शनंयतः॥ततस्तद्दोष
शांतिस्तुतेनहोमेनजायतेत्तिसप्तमांशेशिवरहस्ये॥ध्यानमाहात्म्यम्॥
यदाकदाचिद्धृदयारविंदेमहेश्वरश्रीचरणारविन्दम्॥क्षणंचरंतोयदि
चिंतयंतितदाकृतांतस्यपदंनयान्ति॥जन्मोत्तरंयद्दिकदाचिदपिस्मरारि
पादारविंदमकरंदरसाभिषेकः॥चित्तद्रुमभ्रमरपुंगवपन्नगेस्यात्स्यादे
वतत्रहिभवबंधविमोचनंच॥यदिक्षणंवाशिवपादपद्मंहृत्पद्मसंविष्टम
तिप्रकृष्टम्॥उत्कृष्टएवातिनिकृष्टजन्माप्युत्कृष्टजन्मासतुकिंपुनःस्यात्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कः शक्तो भुवि कर्त्तुमप्यघकुलं तावत्प्रयासेन वा यावन्नाशमुपैति शांकरपदध्या
नेन वा तत्स्मृतेः॥ तत्तावत्सुलं तथापि न करोत्यालस्यपापादिना ते नैव प्रविशं
ति घोरनिरयं संसारराशिं ततः॥ श्रीशिवपादोदकमाहात्म्यम्॥ स्कांदे॥ सन
त्कुमार उवाच॥ माहात्म्यं श्रोतुमिच्छामि शिवपादोदकस्य च॥ किं फलं कः प्र
भावो वा गुणाः के वास्य कीर्तिताः॥ तद्धारयति यो नित्यं शिरसा शिवतत्परः
॥ प्राशनं नियमेनैव प्रयत्नेन दिने दिने॥ कुरुते यो नरो ब्रह्मन्प्रभावस्तस्य
मे वद॥ ब्रह्मोवाच॥ साधु साधु त्वया वत्स प्रश्नोयं पापनाशनः॥ कृतः पादोदक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
४०

स्याद्यच्छ्रणुमहात्म्यमुत्तमम्॥कथयामीहतेवत्सयोग्यस्त्वंश्रुतवानसि॥पा
द्यंतदाविभोस्तस्यगृह्णीयात्पादतोजलम्॥शतधारेणमंत्रेणपंचाक्षर
युतेनच॥धृत्वाशिरसिपादांबुमहत्फलमवाप्नुयात्॥अकालमृत्युश
मनंसर्वव्याधिविनाशनम्॥सर्वपापोपशमनंशंभोःपादोदकंशुभम्॥सद्यः
फलप्रदंपुण्यंसर्वपातकनाशनम्॥सर्वमंगलमांगल्यंसर्वपावनपावन
म्॥दुष्टग्रहोपशमनंसर्वरोगप्रभेदकम्॥सर्वकल्याणकंस्तोत्रंसर्व
कामफलप्रदम्॥पुण्यात्पुण्यतमंशैवंसर्वदोषनिवारणम्॥सर्व

नमष्टसिद्धिप्रदायकं॥सर्वदुःखप्रशमनंसमस्ताधिविनाशनं॥सर्वोप्नातप्रशम २

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तीर्थफलंसम्यक्प्राप्नुयान्मूर्द्ध्निधारणात्॥श्रवणात्सर्वशास्त्राणांवेदवेदांग
धारणात्॥सर्वव्रतानांचरणात्तपसोयत्फलंमुने॥तत्सर्वंलभतेमर्त्योमू
र्द्ध्निपादाम्बुधारणात्॥नारायणशिलांगत्वातत्स्पृष्टेश्राद्धकृन्नरः॥य
त्संख्नोतितदाप्नोतिमूर्द्ध्निपादाम्बुधारणात्॥प्रयागस्यप्रभासस्यपुष्क
रस्यचसेवनात्॥पत्पूदकस्यशुक्लस्यसान्निध्याद्यत्फलंभवेत्॥प्रया
गेचमृतिर्येषांवाराणस्यांमृतस्यच॥कुरुक्षेत्रेमृतानांचभूमिभा
गाश्रयेशुभाः॥सर्वतीर्थोदकस्यैतेकलांनार्हंतिषोडशीम्॥मोनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० वायस्तुगंगायांस्नानधर्मरतोनरः॥तस्ययाद्दक्कभवेत्पुण्यंताद्दक्पादांबु
४१ धारणात्॥अग्निष्टोमाद्योसहस्रात्पौंडरीकामहामुने॥वाजपेयाद्रा
जसूयान्नरमेधाच्चयत्फलम्॥तथाबहुसुवर्णस्यसर्वमेधस्ययत्फ
लम्॥तत्फलंलभतेसद्योमूर्द्धिपादाम्बुधारणात्॥गोदानेनचयत्पु
ण्यंकन्यादानेनयद्भवेत्॥भूमिदानेनयत्पुण्यंसुवर्णमणिदानतः
विद्यादानेनयत्पुण्यं यत्पुण्यंशरणागते॥तत्फलंलभतेसद्यो
मूर्द्धिपादाम्बुधारणात्॥गृहेयस्मिन्प्रसूताश्चन्सूतकंनात्रविद्यते॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवपादांबुसंस्पर्शात्सर्वं पापं प्रणश्यति॥दृषितं चापि पादांबु विश्वाराणाः शु
द्धिमाप्नुयुः॥अन्तकालेपि यश्चैव धार्यते पादयोर्जलम्॥सोपि तज्जनि माप्नो
ति विद्याचार वहिष्कृतः॥अगम्यागमनं येषां पापाचाराश्च ये नराः॥ते
पि पूता भवन्त्याशु शम्भोः पादांबुधारणात्॥भीमोदकं महातीर्थं गंगा
च यमुना नदी॥नर्मदा शरयूः क्षिप्रा तथा गोदावरी नदी॥सदा सन्नि
हितास्त्वेताः शम्भोः पादोदके मुने॥ब्रह्मचारि गृहस्थानां यतीनां भुक्ति
मुक्तिदम्॥पादोदकं पिबेद्यस्तु लिंगमूर्तेः शिवस्य तु॥प्रक्षालयति तत्तो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰ यं ब्रह्महत्यादिपातकम्॥ लिंगोदकं च पादाम्बु प्रसादमिति च त्रिधा॥ नमस्का
४२ र्येहि शिरसा पेयं धार्यं शिवार्थिभिः॥ गंगोदकात्पवित्रं तु शिवपादोद
कादिकम्॥ पीतं वा मस्तकस्थं वा नराणां पापहं परम्॥ दृष्टी पूतं पिबे
त्सर्वं शिवस्य परमात्मनः॥ तद्दृष्टं पापहं पुत्र किं पुनः पादयोर्जलम्॥ शं
भोः पादोदकं पीत्वा पश्चादशुचिशंकया॥ यस्त्वाचामति मोहेन तं विद्या
द्ब्रह्मघातकम्॥ एतत्पादोदकाद्यं तु माहात्म्यं कथितं मया॥ यच्छ्र
द्धया वन्मूर्द्ध्नि प्राशनं कुरु नित्यशः॥ जन्ममृत्युजरामुक्तो मोक्षं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राप्यस्यसिपुत्रक॥तद्रहस्यंनकव्यंमूर्खाणांचत्वयानघ॥कृतघ्नायन
वक्तव्यंनचहिंसारतायच॥नाभक्तायत्वरुद्रायनचपाखण्डिने
सुत॥शान्तायशुद्धभावायदांतायशुभचारिणे॥तीर्थस्नानर
तायैवदेयंधर्मरतायच॥इतिपादोकमाहात्म्यसमाप्तः॥शिवपादो
दकविधीवौधायने॥अथातोमहादेवस्यपादोदकविधिंव्याख्यास्या
मोभगवतःपादौप्रक्षाल्यशंखमापूर्यगंधपुष्पादिभिरभ्यर्च्यकद्रुद्रा
माहारुद्रायेतिद्वाभ्यांमार्जनंकृत्वा॥ऋतद्रसत्यंपरंब्रह्मेतिप्राशयेत्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
४२

॥यएवंकुर्यात्सकुलजान्दशपूर्वान्दशापरानात्मानंचतारयेदोमात्मा
नंचतारयेदित्युपनिषत्॥अनेनप्रकारेणपादोदकंप्राश्य॥इतिपादो
दकमहोविधिः समाप्तः॥स्नानोदकमहात्म्यविधिर्लिख्यते॥सनत्कु
मारउवाच॥माहात्म्यंश्रोतुमिच्छामिशिवस्नानोदकस्यच॥किंफलं
कःप्रभावोवागुणाःकेवास्यकीर्तिताः॥तद्धारयतियोनित्यंशिरसा
शिवतत्परः॥प्राशनंनियमेनैवप्रयत्नेनदिनेदिने॥कुरुतेयोनरोब्रह्म
न्प्रभावंतस्यमेवद॥ब्रह्मोवाच॥साधुसाधुत्वयावत्सप्रश्नोयंपापना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शनः॥कृतःस्नानोदकस्याद्यशृणुमाहात्म्यमुत्तमम्॥कथयामीहतेवत्सयोग्य
स्त्वंश्रुतवानसि॥लिंगाभिषेकजंयच्चतल्लिंगोदकमुच्यते॥तत्रस्नात्वाचपी
त्वाचनाशयत्यखिलामयम्॥स्नापयित्वाविधानेनयोलिंगस्नपनोदक
म्॥त्रिःपिबेत्त्रिविधंपापंतस्यसद्यःप्रणश्यति॥लिंगाभिषेकतोयेनशु
चिर्भूत्वाहरोभवेत्॥मार्जनंमूर्ध्निगात्रेचनिर्मलस्नानमीरितम्॥स्नाना
नांचापिसर्वेषांरहस्यमतिदुर्लभम्॥येनस्नानेनसादेवीरुद्रंभर्त्तारमैति
च॥भीमोदकंमहातीर्थंगंगाचयमुनानदी॥नर्मदाशरयूःक्षिप्रातपागो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
४४

दावरीनदी॥सदासन्निहितास्वेताशिवलिंगोदके मुने॥स्नानोदकंपिबेद्यस्तु
लिंगमूर्त्योःशिवस्यतु॥प्रक्षालयतितत्तोयंब्रह्महत्यादिपातकम्॥अभि
षिक्तंजलंप्रातःपिबेन्नित्यंदिनेदिने॥मूलकुष्टाद्यपस्मारंज्वराणांभेषजं
परम्॥सर्वपापहरंपुण्यंशम्भोर्वक्त्राद्विनिर्गतम्॥अमोघाघसंघानला
लोलशैलप्रभावाभिभावाद्यभावार्चनाम्बु॥महेशाभिषेकाम्बुपीतंघ
तंवास्वमूर्द्ध्नाभवत्यत्रदेवामृतंमे॥शम्भोःस्नानोदकंपीत्वापश्चादशुचि
शंकया॥यद्याचामतिमोहेनतंविद्याद्ब्रह्मघातकम्॥कालमृत्युहरं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रायं ब्रह्महत्यादिनाशकम्॥ व्याधिघ्नं पुरायदं प्रास्ये शिवनिर्माल्यजं नोदकम्॥ स्ना
नोदकं त्रिः पिबेन्नैव यथा स्नानोदकं पुनः पत्रं पुष्पं तथाविधम्॥ तथैव धूपशे
षश्च दीपशेषो न संशयः॥ अथ वर्ज्यावर्ज्य पुष्पाणि ज्ञानमालायाम्॥ ना
क्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम्॥ न दूर्वया यजेद्दुर्गां बिल्वपत्रैर्दि
वाकरम्॥ उन्मत्त मर्कपुष्पं च विष्णो वर्ज्ये सदा बुधैः॥ देवीनां चार्कमंदा
रावादित्ये तगरं तथा॥ गणेशाय च सूर्याय रक्तपुष्पमतिप्रियम्॥ शिवे
कुंदमदंतीं च यूथीं वं धूककेतके॥ जपां रक्तां त्रिसंध्ये द्वे सिंदूरं कुटजानि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च॥मालतीकुसुमं रक्तं हयारिं वर्ववरीं त्यजेत्॥उग्रगंधमगंधं च क्रमिकेशादिदूषि
तम्॥अप्रबुद्धपात्रपारायं गवासोभिः कुत्सितान्यभिः॥आनीतं नार्पयेच्छंभोः
प्रमादादपि दोषकृत्॥कलिकाभिर्नैव यजेद्विना चंपकपंकजैः॥स्वयं वि
काशितैः पुष्पैः स्वयं च पतिते भुवि॥वर्जयेद्बृहतीद्वंद्वं कांचनारं कुरंटकम्
अपरगस्य ब्रह्मसंभूतैः कुसुमैररसितैः सितैः॥येर्चयन्ति च देवेशं तैः प्राप्तं पर
मं पदम्॥भविष्यैर्धत्तूरकैश्च यो लिंगं सकृत्पूजयते नरः॥स गोलक्ष
फलं प्राप्य शिवलोके महीयते॥अत्र विशेषः॥सर्वपुष्पैः सदा पूजा वि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हिताविहितैरपि॥कर्त्तव्यासर्वदेवानांभक्तियोगोऽत्रकारणम्॥पुष्पं
वायदिवापत्रंफलंनेष्टमधोमुखम्॥दुःखदंतत्समाख्यातंयथोत्प
न्नंतथार्पणम्॥चित्रपूजासुसर्वासुनविरुद्धस्यदूषणम्॥अधोमु
खार्पणंनेष्टंपुष्पांजलिविधौनतत्॥अपर्युषितापर्युषितनिर्ण
यः भविष्ये॥प्रहरंतिष्ठतेजातीकरवीरमहर्निशम्॥तुलस्यांविल्वप
त्रेषुसर्वेषुजलजेषुच॥नपर्युषितदोषोस्तिमालाकारगृहेषुच॥०
ज्ञानमालायाम्॥नपर्युषितदोषोस्तिजलजोत्पलचंपके॥तुलस्या

लक्षपूजासुसर्वासुपुष्पमेकैकमर्पयेत्॥समुदायेनचेत्पूजालक्षपूजार्पणंनतत् ४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गस्त्विवकुलेविल्वंगंगाजलेतथा॥समित्पुष्पकुशादिनिब्राह्मणाःस्वय
माहरेत्॥शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्पतत्यधः॥सनत्कुमारे
पपुराणे॥तृणान्योषधिगुल्मानिलतावल्लीतथैवच॥देवार्थेय
स्तुहिंसेतधार्मिकोनतुहिंसकः॥तथैवसर्ववृक्षाणांपत्रंपुष्पंफलंत्व
चम्॥कालजानिचपुष्पाणिवीजानिशतधातथा॥महादेवोपयुक्ता
निस्वर्गंयांतिनसंशयः॥तत्रैव॥चिरपर्युषितंमाल्यंभवस्यापनयेच्च
यः॥गोसहस्रफलंपुण्यंप्राप्नुयान्नात्रसंशयः॥उत्तानविल्वपत्रेणपू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जयेत्सर्वसिद्धये॥ तस्मात्सर्वप्रयत्नेन विल्वपत्रैः सदार्चयः॥१॥ सोदकैर्वि
ल्वपत्रैश्चयः कुर्यान्मम मस्तके॥ सल्लैरभिपूज्य पार्वतीशं सकला
पज्जलधिंतरंतिधीराः॥ विल्वमाहात्म्यम् आदित्यपुराणे॥ विल्व
पत्रैरखंडैस्तु सकृन्संपूजयते शिवम्॥ सर्वपापविनिर्मुक्तो रुद्रलोके म
हीयते॥ पञ्चाक्षरेण मंत्रेण विल्वपत्रैः शिवार्चनम्॥ करोति श्रद्धया
यस्तु स गच्छेदैश्वरं पदम्॥ दर्शनाद्विल्ववृक्षस्य स्पर्शनाद्वंदनादपि॥
अहोरात्रकृतं पापं नश्यत्येव हि नारद॥ अन्तकाले नरो यस्तु विल्वम्
नराणामिदं नारं ज्ञानं तत्र द्युतिखण्डयति ज्ञानोपदेशेनेति नारदः॥ गायत्रीनारायणाकर्षां सदापाप
भयापहाम्॥ नारदो नाशयन्नेति नृणामज्ञानजं तमः इति नारदीयोक्तेः॥१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० तस्यमृत्तिकाम्॥ आलिप्यसर्वगात्राणिसतोयातिपरांगतिम्॥ विल्ववृक्षं
४७ समासाद्यद्वादशाहमभोजनम्॥ यःकुर्याद्ब्रह्महापापान्मुच्यतेनात्रसं
शयः॥ विल्ववृक्षंसमासाद्यत्रिरात्रोपोषितःशुचिः॥ हरनामजपेल्लक्षं
भ्रूणहत्यांव्यपोहति॥ विल्वपत्रैरखंडैस्तुपूजयेदिंदुसेखरम्॥ कृष्णा
ष्टम्यांसंयतात्माब्रह्महत्यांव्यपोहति॥ मातृहापितृहावापियुक्तोवा
सर्वपातकैः॥ माघेकृष्णचतुर्दश्यांपूजयेदिंदुसेखरम्॥ भक्त्याविल्वद
लैर्मौनीहरनामजपन्निशि॥ सर्वपापविनिर्मुक्तोयातिशैवंपरंपदम्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुष्कैः पर्युषितैः पत्रैरपि विल्वस्य नारद॥ पूजयेद्गिरिजानाथं मुच्यते स
र्वपातकैः॥ शिवरहस्ये॥ नित्यमार्द्रैरनार्द्रैर्वा विल्वपत्रैः सदाशिवम्॥
पूजयस्व महादेवं तस्मान्माप्रमदो भव॥ विल्वपत्राणि शुद्धानि स्वतः
पर्युषितान्यपि॥ शंकरार्चनयोग्यानि भवंतीत्यस्ति हि श्रुतिः॥ सुवर्णं
विल्वपत्रं च रत्नं च रजतं तथा॥ नहि पर्युषितं यस्मात् शुद्धमेव स्व
यं यमः॥ अर्पितान्यपि विल्वानि प्रक्षाल्य च पुनः पुनः॥ शंकरायार्पणीया
नीन नवानि यदि क्वचित्॥ शुष्कं खण्डितमार्द्रं वा विल्वपत्रं शिवप्रियम्॥ तस्मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्चयेयत्नेनविल्वपत्रैःसदाशिवम्॥अनाघ्रातंविल्वपत्रंयादृशंतादृ
शंशिवे॥विनिक्षिप्यमहापापैर्मुच्यतेनात्रसंशयः॥तत्रैवंभूतिपूजो
त्तरंविल्वैरर्चनीयोमहेश्वरः॥प्रत्यहंनियमेनेतिप्राहुर्जाबालवादिनः॥
ब्रह्मोत्तरखण्डे॥माघमासेमहापुण्यायांयासाकृष्णचतुर्दशी॥शिवलिं
गंविल्वपत्रंदुर्लभंहिचतुष्टयम्॥शिवगीतायाम्॥विल्वमूलमृदाय
स्तुशरीरमुपलिंपति॥अन्तकालेंतकजनैःसदूरीक्रियतेनरः॥यस्तु
विल्ववनेनित्यंकुटींकृत्वावसेन्नरः॥सर्वेमंत्राःप्रसिध्यन्तिजपमात्रे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णाकेवलम्॥ विल्ववृक्षंसमाश्रित्ययोमंत्रान्विविधान्जपेत्॥ एकेन
दिवसेनैवपुरश्चर्याकृताभवेत्॥ विल्वमूलेमहादेवंविल्वरूपि
णामव्ययम्॥ यःपूजयतिपुण्यात्मासशिवंप्राप्नुयाद्ध्रुवम्॥ श
क्तिहीनोपियोमंत्रोविल्वमूलेषुजायते॥ ससिद्धःस्वफलंदद्यात्
दिमाहेश्वरप्रियः॥ दीपमालांविल्वमूलेयःकल्पयतिसादरम्॥
सतत्वज्ञानसंपन्नोमहेशांतर्गतोभवेत्॥ विल्वशाखांसमादायह
स्तेननवपल्लवम्॥ गृहीत्वापूजयेद्विल्वंतेनपापैःप्रमुच्यते॥ मह

जप्य

खा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० देव्युवाच॥ उत्तराग्रेराग्रपत्रैराग्रपूजनीयोहमेवहि॥ किंपुनर्बहुनोक्तेन
४८ नविल्वपत्रंममप्रियम्॥ एकेनापिचविल्वेनसकृत्संपूजयेद्धि
माम्॥ समुक्तोमोचयेदन्यान्निति विधिमहेश्वरि॥ विल्वपत्रंसदा
देवियथाप्रियतरोगुहः॥ सर्वपुष्पात्प्रियतरंपत्रैर्वापरमेश्वरि॥ त
थाविल्वार्चनेनैवसर्वेषांमुक्तिदोस्म्यहम्॥ कृतानंतमहापापोप्य
नायासेनमुच्यते॥ विल्वपत्रैश्चसंपूज्यमल्लिंगमभिवीक्ष्यतः॥१०
प्रातःसंगवमध्याह्नेसायंचापिप्रदोषके॥ सोमवारेचतुर्दश्यां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पर्वस्वपिविशेषतः॥ बिल्वपत्रैः समभ्यर्च्य सर्वान्सिद्धिंलभेन्नरः॥ म
मप्रियतरोभूयान्मेप्रसादं चविंदति॥ सुहृत्तोवापिदुर्वृत्तोविल्वैर
भ्यर्च्यमांशिव॥ ससर्वपूज्योभवतिसतपस्वीमुनिस्वयम्॥ अग
स्त्यउवाच॥ ततोविल्वदलैःशुद्धैरछिद्रैःकोमलैर्नवैः॥ पूजनीयः
प्रयत्नेनलिंगरूपीसदाशिवः॥ शुष्कैःपर्युषितैश्छिद्रैर्यादृशै
स्तादृशैरपि॥ विल्वपत्रैर्महादेवपूजनीयः प्रयत्नतः॥ रत्नवद्वि
ल्वपत्राणिसंग्रह्यद्विजपुंगव॥ पूजयंतिमहादेवंवेदमार्गप्रव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ५० त्तिकाः॥चूर्णीकृतान्यपिप्राज्ञाविल्वपत्राणिवैदिकाः॥संपाद्यपूजयंती
शंनवालाभेविचक्षणाः॥विल्वपत्रार्चनेनैवसाङ्गंशंकरपूजनम्॥
विल्वपत्रंविनापूजानसांगापार्वतीपतेः॥धूपदीपोपहारादेरभावे
पिद्विजोत्तमाः॥साङ्गंविल्वदलैरेवभविष्यतिशिवार्चनम्॥वस्त्रा
द्यर्थंविल्वपत्रंप्रदेयंश्रीमहेशितुः॥वस्त्रादिदानतोप्येतरभवत्ये
वहिपुण्यदम्॥सर्वार्थेविल्वपत्राणिभविष्यन्तिनसंशयः॥विल्व
पत्रार्थमन्यत्तुभवत्येवनसर्वथा॥रत्नंचविल्वपत्रार्धंनभवत्येवस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेथा॥ विल्वपत्रसमंवस्तु न भूतं न भविष्यति॥ एकेनाप्यतिशु

द्धेन विल्वपत्रेण यः शिवम्॥ समर्चयति यत्नेन स शिवं प्रतिप

द्यते॥ स पाताद्ब्रोसो मयुक्तभूतायां निशि शंकरम्॥ विल्वपत्रैः

समभ्यर्च्य ब्रह्महापि विमुच्यते॥ विल्वपत्रैर्महादेवं पूजयित्वा पुरा

द्विजाः॥ वहवो मोक्षमापन्नाः संख्या तेषां न विद्यते॥ सहस्रार्बु

द पुष्पाणां पूजया यत्फलं भवेत्॥ ततोपि कोटिगुणितं वि

ल्वपत्रार्चनात्फलम्॥ सहस्रार्बुदरत्नानां पूजया यत्फलं भ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
५१

वेत्॥ ततोपि कोटिगुणितं पुण्यं लभते मर्त्यो यवराशिभिरर्चने॥ ततोपि
कोटिगुणितं विल्वपत्रार्चनात्फलम्॥ कृत्वा यत्नेन सततं ब्रह्महत्या
र्बुदान्यपि॥ विल्वेन शिवमभ्यर्च्य तत्पापेभ्यो विमुच्यते॥ अनंतब्र
ह्महत्यादि पापानि विविधान्यपि॥ सद्यो नश्यन्ति विल्वेन पूजिते
हि महेश्वरे॥ इति जावालवादिनः॥ शुद्धात्स्वहृतैः क्रयःक्रीतैर्विल्व
पत्रैर्महार्चनम्॥ यः करोति समूढात्मा रौरवं नरकं व्रजेत्॥ ०
शिवरहस्ये॥ रत्नैर्वा मणिभूषणै रौरपितया छत्रैर्वितानादिभिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मृक्तालंकृतचामरैरगिरिगितैःस्रग्भिस्तथाचंदनैः॥त्वप्नोनःस्त्रिपुरां

तकःखलुनवैर्विल्विदलैःकोमलैर्नीरैर्हारसमर्पितेपरमयंतुष्टोभ

वानीपतिः॥प्राप्याप्यव्यभिचारिणिम्मतिदृढ्यांभक्तिंमुहुःसाद

रं योविल्वार्चनतत्परोनवलसद्दिल्विदलैःशंकरे नस्यात्तस्यग

तिःकदापिनभवत्येवेतिमन्येततः॥शर्वाराधनमेवसाधुविविधै

र्वि ल्वैर्विधेयंनवैः॥विल्वमूलेप्रजप्तोयोमंत्रःकोटिगुणोभवेत्

॥शाम्भवंभोजयेद्देविविल्वमूलेविशेषतः॥सदरिद्रोपिसंपन्नो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० भवत्येवनसंशयः॥ विल्वमूरुहमेकंवायोभिषिंचतिपायसा॥ अन्ये
५२ नापिसयात्येवनरः शंकरमंदिरम्॥ लक्षशोविल्वपत्राणांपूज
यागिरिजापतिः॥ संतुष्टोमोक्षलक्ष्मिंचददात्येवनसंशयः॥ शि
वरहस्ये विष्णुरुवाच॥ विल्वपत्रेणसंपूज्यलिंगरूपिणमीश्व
रम्॥ ब्रह्महत्यादिकोटिभ्योमुच्यतेनात्रसंशयः॥ विल्वपत्रैर्मह
देवः पूजीतः श्रद्धयाद्विजाः॥ अवशोपिस्वतः शुद्धोवशोभवतिव
सुतः॥ पुराकश्चिद्द्विजवरः शिवलिंगार्चनप्रियः॥ विल्वपत्रैर्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णदेवंपूजयित्वास्थितःसदा॥विल्वपत्राणयलभ्यानिभविष्यन्तीतिशं
कया॥समुष्कविल्वपत्राणिगृहेसंस्थाप्यसंस्थितः॥नवानिविल्व
पत्राणिनप्राप्नोतियदातदा॥शिवलिंगंविल्वपत्रैःशुष्कैरभ्यर्च्य
संस्थितः॥विल्वपत्रैरनभ्यर्च्यशिवलिंगंशिवात्मकम्॥नपिवत्ये
वसजलंतत्रषार्तोपिप्रयत्नतः॥विल्वपत्रार्चनंत्यक्त्वानपिवामि
जलान्यपि॥विल्वपत्रार्चनाभावेमरणंमेभविष्यति॥एकेनवा
जलार्द्रेणविल्वपत्रेणशंकरम्॥यःपूजयतियत्नेनसपापेभ्यो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० विमुच्यते॥भक्त्याविल्वदलैरीशंयःपूजयतिसर्वदा॥सवंशकोटिसंयु
५३ क्तःशिवलोकंप्रयास्यति॥नित्यंविल्वदलैरीशंपूजनीयःप्रयत्नतः॥
वेदोक्तशिवमंत्रेणचतुर्वर्गफलार्थिभिः॥विल्वैःशिवार्चनंकर्त्तुंय
ततेयोयदातदा॥रुंदंतिपापगिरयःक्वगंतव्यमितिध्रुवम्॥प्रयछ
तियदाभक्त्यायोविल्वंलिंगमस्तके॥तदातदघसंघातोदग्धोभव
तिसर्वथा॥योविल्वमूलस्थितलिंगपूजांकरोतिभक्त्यानवविल्वपत्रैः॥
तत्पुण्यराशिर्गणनामतीतःसएवकैलासपतिप्रियोपि॥नरत्नानिगृह्णा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिगौरीसहायोयथाविल्वपत्राणिग्टह्णातिमूर्द्ध्नि॥स्वभक्तार्पितानिप्रिया
णीतिमत्वाददात्येवमुक्तिंसतैरर्चितोपि॥इतिविल्वमहात्म्यसमाप्तः
धूपमहिमाविष्णुधर्मोत्तरे॥वसन्तेगुग्गुलंदत्वाप्यग्निष्टोमफलं
लभेत्॥ग्रीष्मेचंदनसारेणपुंडरीकफलंलभेत्॥कर्पूरदानाच्छ
रदिवाजिमेधफलंलभेत्॥शिशिरेगुरुसारेणसर्वमेधमवाप्नुया
त्॥धूपदःस्वर्गमाप्नोतिधूपदस्तुष्टिमश्नुते॥धूपलेखायथैवोर्द्ध्वंनित्य
मेवप्रसर्पति॥तथैवोर्द्ध्वगतिर्न्नित्यंधूपदाताभवेन्नरः॥नदेहेदूषितं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०

५८

धूपंकार्पासास्थिशिरोरुहैः॥अन्यथानरकंयातियावदिंद्राश्चतुर्दश॥इ
तिधूपः॥धूपकरणपात्रादिविशेषः॥सुवर्णरूप्यताम्रादिनानाधा
तुविनिर्मितौ॥पात्रेतुद्विपदेभुग्ननालपद्माकृतौशुभे॥सारांगार
समायुक्तेगंधद्रव्यैर्यथोदितैः॥गुग्गुलाद्यैर्घृताभ्युक्तैर्धूपमापा
दयेत्सुधीः॥शैवागमे॥धूपभाजनमस्त्रेणप्रोक्ष्याभ्यर्च्यहृदा

मु

णुना॥अस्त्रेणपूजितांघंटांवादयन्गुग्गुलंदहेत्॥अस्त्रेणप्रो
क्ष्यघंटांमंत्रेणपूजितामितिव्याख्येयम् तदुक्तम्॥जगध्वनिततो

फट्स्वाहेतिमंत्रेण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मंत्रमातःस्वाहेत्युदीर्यच॥ग्प्रभ्यर्च्यवादयन्घंटांधूपंदद्यात्समाहित
इति॥तथाच॥धूपपात्रंसमभ्यर्च्यतर्जन्यावामयास्पृशन्॥संकल्प्ये
वंततःपुष्पांजलिंदत्वायशःपठेत्॥तथोक्तंपुरश्चरणचंद्रिकायाम्
॥सारांगारेघृतविलुलितैर्जर्जरैःसन्निकीर्णैःकर्पूराद्यैर्घनपरिमलैर्धू
पमापाद्यमंत्री॥दद्यान्नीचैरसुरमथनायापरेणाग्रदोष्णाघंटागंधा
क्षतकुसुमकैरर्चितांवादयानः॥इति धूपंगृहाणदेवेशसुगंधंसघ
तंशिव॥पातकानिहरस्वेशाधूपदानेनसादरम्॥दीपदानमहिमान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
५५

सिंहपुरारणे॥ यस्तुदद्यात्प्रदीपंमेसर्वतः श्रद्धयान्वितः॥ स्वयंप्रभेषुदेशेषुतस्यो
त्पत्तिर्विधीयते॥ विहायपापंसकलंसहस्रादित्यसंनिभः॥ ज्योतिष्मताव
मानेनशिवलोकेमहीयते॥ दीपपंक्तेसुरचनांकुरुतेशंकरालये॥ त
स्यान्वयप्रसूतानांलक्षाणांनरकंनहि॥ तांश्चदत्वानहिंसेतनचतैल
वियोजनम्॥ कुर्वीतदीपहर्त्तातुमूकोंधोजायतेनरः॥ अंधेतमसिदु
र्वारेनरकेपच्यतेकिलेति॥ इतिदीपः॥ दीपंगृहाणदेवेशपातकध्वां
तनाशकः॥ प्रसीदपार्वतीनाथदीनबंधोदयानिधे॥ दीपकरणोपात्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्विशेषः॥दीपोप्येकपदेभुग्ननालपद्माकृतौशुभे॥गोघृतादिभिरापू
र्णपात्रेस्वर्णादिनिर्मिते॥प्रतिपात्रेप्रदीप्तश्चवर्त्यागव्यघृतात्तया॥त्र
न्यानिवेदितापूजाकालएवंप्रशस्यते॥तथा॥वर्त्याकर्पूरगर्भिराया
सर्पिषातिजलेनवा॥आरोप्यंदर्शयेद्दीपानुच्चैःसौरभशालिनः॥
तथाचप्रयोगसारे॥तैलेनकपिलाज्येनसिचकेनापरेणवा॥स्नेहे
नवर्त्तिसंयुक्तंदीपमुच्चैःप्रदर्शयेत्॥शिवनैवेद्यग्रहणमाहात्म्यम्
स्कांदे॥प्रसादंत्रिविधंप्रोक्तंशुद्धंसिद्धंप्रसिद्धकम्॥शुद्धंलिंगमुखा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० त्यक्तं सिद्धं च प्रविसर्जितम् ॥ प्रसिद्धं गुरुरगात्यक्तमित्येतत्त्रिविधं स्मृ
५६ तम् ॥ लिंगार्पणं तु सर्वं च बाह्याभ्यंतरं तो भवेत् ॥ रूपं द्रव्यस्य वाह्य
नु नीरूपं चान्तरे पुनः ॥ शिवस्वामिकमेवान्नं शिवाय विनिवेदयेत्
॥ विनियोगोपचारेण संतुष्यति सदाशिवः ॥ सर्वलोकैकनाथ
स्य शम्भोः कः किं प्रयच्छति ॥ उपचारप्रियः शम्भुः स्तेनैवायं प्र
सीदति ॥ शिवोपभुक्तं स्रग्गंधमन्नपानादिकं तथा ॥ निवेदितमि
ति प्रोक्तं सर्वपापहरं परम् ॥ खाद्यानि चादनीयानि पेयान्यन्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नियानिवै॥तानिदेयानिशंभोस्तद्भक्तीयाद्दासभावतः॥स्वेष्टलिंगाय
दत्तंचचरुकंतन्नसंशयः॥तत्प्राशयेत्स्वयंप्राज्ञोनान्यस्यैवतुदापये
त्॥नदद्याद्भोजनलादिभ्योदद्याच्चेन्नरकंव्रजेत्॥सुदृढशिवप्रसादे
तुसुचित्वंयोनभावयेत्॥सोपियातिनरोघोरंनरकंकालमक्षय
म्॥सुप्रतिष्ठितलिंगेतुनयथापूर्वभावना॥तयाशिवप्रसादस्यपू
र्वेनामनसंस्मरेत्॥पत्रंपुष्पंफलंतोयमन्नपानाद्यमौषधम्॥०
मनिवेद्यंनभुंजीतयदाहारायकल्पितम्॥इक्षुदण्डफलापूपाः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
५७

खाद्यानिव्यंजनानिच॥प्रसादान्येवभोक्तव्यान्यन्यद्भोमांसविट्सम
म्॥सर्वंचत्तरणकाद्यंचभक्ष्यंचैवानुलेपनम्॥गंधोमृगमदश्चैव
कर्पूरंतैलमंजनम्॥रत्नाभरणजातंचवस्त्रंसकलवाहनम्॥प्रसा
दमेवभोक्तव्यमन्यच्चेद्गलविट्सममम्॥कर्मणामनसावाचात्रि
विधंचार्चितंशुभम्॥नोचेदनर्पितंभुक्तंप्रसादंनिष्फलंभवेत्
॥[illegible]॥रूपंसमर्प्यद्रव्यस्यरु
म चिंप्यर्पयेत्ततः॥उभयार्पणाहीनंचेत्प्रसादंनिष्फलंभवेत्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दीपांत उपचारः स्यान्नैवेद्यान्तं च पूजनम्॥ तस्मान्नैवेद्यहीनं चेत्पू

य जालोपो भवेत्सदा॥ तत्प्रसादं भोग्यं तन्नैवेद्यार्पणमुच्यते॥ प्रसादा

दनहीनं चेदर्पितं चापि निष्फलम्॥ व्रतोपवासनियमैर्येन केना

पि हेतुना॥ पूजाप्रसादलोपश्चेन्नासावाप्नोति तत्फलम्॥ उपवास

सहस्राणि प्राजापत्यायुतानि च॥ शिवः प्रसादसिक्तस्य कोट्यंशे

नापि नो समम्॥ अश्वमेधयागसहस्रेणाप्यलंयोगार्बुदैरपि॥ भक्ति

ते शिवनैवेद्ये शिवसायुज्यमाप्नुयात्॥ दृष्टेपि शिवनैवेद्ये यान्ति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

८५॥

शिव० पापानिदुरतः॥भक्षितेशिवनैवेद्येपुराण्यां यान्तिकोटिशः॥ब्रह्म
५८ ाडपुराणे॥जावालश्रुतिः॥रुद्रभुक्तंमुंजीयादुद्रपीतंपिबेद्रुद्राघ्रा
तंजिघ्रेद्रुद्रेराग्रान्नमश्नंति रुद्रपीतंपिबंतिरुद्रेराघ्रातंजिघ्रन्ति
तस्माद्ब्राह्मणाः प्रशान्तमनसोनिर्माल्यमेवभक्षयन्तीति॥त्रि
त्रिषुलोकेषु निंद्यान्नम् गुप्सान्नमश्नियात् यद्विपाप्माशिवानर्पितंमुंक्ष्व तंदेनोमुंक्ष्वम तद्देनोसामान्यपातकम्
लंमुंक्ष्वकल्मिंमुंक्ष्वंअघंमुंक्ष्वंअधोगच्छ॥ऋग्श्रुतिः॥अन्त
रिच्छन्तिजनेरुद्रंपरोमनीषयाग्रे जिजिह्वयाससम्॥अन्त
अघंमहापापम्

८५॥

रिछंतियेरुद्रंसदावंद्यंमनीषया॥२॥ह्णातिजिह्वयासोयंरसपूर्णामृ
तोदकम्॥१॥अन्नर्नैछन्तियेरुद्रंभवानिसहितंशिवम्॥पुरीषमे
वग्रह्णन्तिजिह्वयातेनसंशयः॥असमर्प्योदनंशंभोःभुंक्तेखाद
तिपातिचेत्॥स्वमांसमस्थिमूत्रंचभुंक्तेखादतिपातिच॥३॥ई
शार्चनावर्ज्यमभोज्यमन्नंकीटंमलंतत्कुणपंवदंति॥वहिष्कृतं
सर्वजनैस्सदापिभुक्त्वाप्रजायान्नरकान्समस्तान्॥४॥पादोदकं
पुरैंभिदः पाशजालहरंपरम्॥रोगकुष्ठाद्यपस्मारज्वराणांभेष

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जंपरम्॥ इतिश्रुतेः॥ ना... विष्णुविलोचनंकटितटेश्रीनारसिंहाजि
नंहारेकूर्मशिरोलसत्क... कालनामायुधम्॥ भूलाग्रेनशव
केशवंहरिशिरोमालादधन्मौ... ॥ सर्वंविष्णुमयंसदाशिवव
पुःव्यक्तंपुरा... ॥७॥ तथाचस्कांदे॥ शिष्टाःशंताश्चये
रुद्रभुक्तमेवहिभुंजते॥ घ्रातमेवहिजिघ्रंतिपीतमेवपिवंतिचे
ति॥ अतएवकूर्मपूराणे॥ यःश्राद्धकालेहरभुक्तशेषंददाति
भक्त्यापितृदेवतानाम्॥ तेनैवपीराडनंतिलैर्विमिश्रैस्तैस्तक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ल्पकोटीः पितरः सुतृप्ताः इति॥ आ दित्यपुराणेपि॥ एकएवेति
योरुद्रः सर्वदेवेषु गीयते॥ तस्य प्रसादलेशेन मुक्तिर्भवति किंक
री॥ तिलषोडश भागं च तत्‌राग्रं वुकरोणपमम्॥ पादोदकप्रसा
दान्नसेवया मोक्षमाप्नुयात्॥ स्वेष्टलिंगप्रसादीस्यान्नोपवासप
रो भवेत्॥ मोहाद्यस्तु चरेत्तस्य प्रत्यवायो महान्भवेत्॥ प्रसादभो
क्तॄन्निंदति ये जना भक्तिसंयुतान्॥ ते यान्ति पितृभिः सार्द्धं नरकं
नात्रसंशय इति॥ एतच्च निर्माल्यग्रहणं प्रसादवुध्यैव कर्त्तव्यं न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
६०

लोभेन॥ तथा च वायवीयसंहितायाम्॥ ततः स्वयं तु भुंजीत शुद्धमन्नं यथा
सुखम्॥ निवेदितं च देवाय तच्छेषं चात्मशुद्धये॥ श्रद्धधानो न लोभेन
न चराऽग्नसमर्पितम्॥ गंधपुष्पादि यच्चान्यत्तत्राप्येष समो विधिरि
ति॥ तथा च॥ निर्माल्यभक्षणे दोषो धारणे च विशेषतः॥ न धारयेत्त्वचि
च्छं भो निर्माल्यं न च लंघयेदित्यादि शिवपुराणादिवचनानि लौ लोभ
विषयान्येवेति भावः॥ उक्तं चादित्यपुराणे॥ लोभान्न धारयेच्छंभोर्नि
र्माल्यं न च भक्षयेत्॥ न स्पृशेदपि पादेन लंघयेन्नापि नारदेति॥ तदपि

शैवैरेवग्राह्यंनत्वन्यैः॥तथाचशिवपुराणे॥निर्माल्यंनिर्मलंशुद्धंनिर्म
लत्वादनिंदितम्॥तस्मादभोज्यंनिर्माल्यंप्राकृतैरशिवात्मकैः॥लोमा
न्नधारयेच्छंभोर्निर्माल्यंनचभक्षयेत्॥जिह्वाचापलसंयुक्तःशिव
संस्कारवर्जितः॥शिवनिर्माल्यभोजीचरौरवंनरकंव्रजेदिति॥ब्रह्मांडेई
श्वरवचनम्॥नैवेद्यंपुरतोन्यस्तंदर्शनेस्वीकृतंमया॥रसान्भक्तस्यजि
मि ह्वाग्रादश्नामिकमलोद्भवः॥निर्माल्यंदेवदेवस्यचाघ्राणशतात्द्दृरम्॥तस्मा
त्पादोदकंपेयंप्रसादान्नंचभुज्यताम्॥भक्षयेद्योनरोभक्त्यापवित्रमति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० शुद्धिदम्॥ शुद्धः स्याद्ब्राह्मणस्तस्य क्षिप्रं पापं प्रनश्यति॥ मदेकशरणा
६१ स्तेषां योग्यं नैवान्यजन्तुष्विति॥ तस्मान्निषेधो न भक्तानां लोभ
प्रवृत्तानामेवेति सिद्धम्॥ कामिकेपीश्वरवचनम्॥ अशुद्धात्माशुचि
र्लोभान्मद्भुक्तं पावनं परम्॥ भक्षयेन्नाशमायाति शुद्रोप्यध्ययनादि
वेति॥ अत्रोपनयनसंस्काररहितानामेँधनवल्लोभान्छिवदीक्षारहि
तानां ग्रहणं दोषायेति स्पष्टमेव॥ तथा च शिवपुराणे॥ ये वीरभद्रशा
पिताः शिवभक्तिपराङ्मुखाः॥ शंभोरन्यत्र देवेषु ये भक्ता ये न दीक्षिताः

ध्याय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेषामनर्हमीशास्यतत्प्रसादचतुष्टयमिति॥ ननुमदीयभुक्तानिर्मा
ल्यंपादाम्बुकुसुमंजलम्॥ धर्ममर्थञ्चकामंचमोक्षंचददतेक्रमा
त्॥ मल्लिंगधारिणोलोकेदेशिकामत्परायणाः॥ मदेकशरणास्तेषांयो
ग्यंनैवान्यजन्तु ष्विति शिवसंहितावचनाच्छिवलिंगधारिणोप्या
गामिकान्प्रत्येवग्रहणाविधिरयमस्तु॥ नचपुराणोक्तम् कथंतदा
गमिकान्प्रतिस्यादितिवाच्यम्॥ क्वचित्तंत्रानुसारेणधर्मे पौराणिका
अपिवदन्ति तादृशेंशास्तुग्राह्यस्तंत्रावलंविनिति पराशरपुराणवच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नादितिचेन्न॥प्रत्यक्षश्रुतिविहितत्वाद्वैदिकत्वसिद्धेः तदुपबृंहकाण्येवपु

राणवचांसि एवंचमल्लिंगधारिणाइत्यत्रलिंगपदंदीक्षाविभूतिरुद्रा
क्षादिचिह्नपरमितिबोध्यम्॥तस्मान्नागमिकात्ययम्विधिः किंतुवै
दिकान्यत्यपीतिध्येयम्॥अयंचनिर्माल्यग्रहणविधिर्ज्योतिर्लिंगा
दिविषयएव॥तथाचपुरुषार्थप्रबोधे भविष्ये॥ज्योतिर्लिंगंविना
यः लिंगंपूजयतिसत्तमः॥तस्यनैवेद्यनिर्माल्यंभक्षणात्तप्तकृच्छ्रकम्॥
शालग्रामोद्भवेलिंगेबाणलिंगेस्वयंभुवि॥रसलिंगेतथापार्षेचसुर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धप्रतिष्ठिते॥ हृदयेचंद्रकान्तेचस्वर्णेरूप्यादिनिर्मिते॥ शिवदीक्षा
रताभक्तेनेदंभक्ष्यमितीर्यते॥ तथा॥ बाणलिंगेस्वयंभूतेचन्द्रका
न्तेहृदिस्थिते॥ चांद्रायणसमंज्ञेयंशम्भोर्नैवेद्यभक्षणम्॥ लिंगे
स्वयंभुवेबाणेरत्नजेरसनिर्मिते॥ सिद्धप्रतिष्ठितेचैवनचंडाधिकृति
र्भवेत्॥ यत्रचंडाधिकारोस्तितद्भोक्तव्यंनमानवैः॥ चंडाधिकारोनो
यत्रभोक्तव्यंतच्चभक्तितः॥ नैवेद्यम्याम्॥ बाणलिंगेचलोहेचसि
द्धलिंगेस्वयंभुवि॥ प्रतिमासुचसर्वासुनचंडोधिकृतोभवेदिति॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
६३

नचैनंगाह्यंशिवनिर्माल्यंपत्रंपुष्पंफलंजलम्॥शालिग्रामशिलासंगात्स
र्वंयातिपवित्रतामिति हेमाद्रिधृतं स्कांदादिवाक्यात्पंचायतनपूजायांत
त्रैरागनिवेदितविषयकान्येवग्रहणवचनानिसन्तु॥नचशिवनिर्माल्यप
दस्यसमस्तस्यविशिष्टनैवेद्यैनैरपेक्ष्यवाधेनासंभवात्तद्वोधकवचना
नांकेवलनिर्माल्यविषयत्वंस्यादितिवाच्यंडित्थडपित्थयोर्मातरिडि
त्थमातेतिवचनवदुपपत्तेः॥अन्यथोदाहृतवचनानिस्यामंजस्यापत्ते
श्च॥नचकेवलशिवपूजाविधानंतरमेवश्रुतौतत्पादोदकग्रहणकथना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्केवलतन्यूनेपिग्रहणंसिध्यतीतिवाच्यम्॥ब्रह्मणास्तेजःप्रभृतिस
ष्टिप्रतिपादने॥आकाशवाय्वोरविशिवपूजायांनिर्माल्यग्रहणानु
रोधेनशालिग्रामशिलासान्निध्यस्यापिकल्पनियतत्वादितिचेन्न॥प्र
कि सादमन्यदेवस्यभुज्यतांल्किषीभवेत्॥शिवस्यैवतुनिर्माल्यंभक्त्या
धार्येद्विजातिभिः॥इतिस्कांदस्यव॥शम्भोर्निर्माल्यकंभुक्त्वंभुंजीया
त्सर्वतोद्विजः॥अन्यदेवस्यनिर्माल्यंभुक्त्वाचांद्रायणंचरेदिति॥सू
तसंहितायांच॥मदेकशरणा॥इत्यादिपूर्वोक्तवचनेचावगम्यमानस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसादग्रहणस्योदाहृतश्रुतिमूलकत्वोपपत्तेःशालिग्रामसान्निध्यक
ल्पनस्यायोगात्॥प्रत्युतसान्निध्यकल्पनेतत्प्रसादत्वात्यापिभावा
त्किल्विषापत्तेर्दूर्वारत्वात्॥एवंचकेवलशिवप्रसादजातंतद्भक्तैर्भो
क्तव्यमेव॥अन्यैरपिशालिग्रामसन्निधानेसतिभोक्तव्यमिति
व्यवस्थेतियुक्तमुत्पश्यामः॥एतेनशालिग्रामसान्निध्यएवशिव
निर्माल्यंग्राह्यमितिम प्रदानग्राह्यमितितिप्पितत्वादिगौडग्रं
थानिर्णयसिंधुभट्टोजिदीक्षितग्रंथाश्चपरास्ताः॥श्रीसांबशिवार्प

रामस्तु॥ शिवप्रसादोदकमहात्म्यं विधी अग्निचोरभयंपुत्रपुरुषस्यनविद्यते॥ अल्पमृत्युभयंनास्तिसिंहव्याघ्रभयंतथा॥ सर्वप्राणिभयंनास्तिप्रसादोदकदर्शनात्॥ तत्प्रसादोदकस्पर्शात्रौरायमन्यन्नविद्यते॥ भूतप्रेतपिशाचानांशाकिनीनांस्मरणादपि॥ जरारोगविषादीनांयतःकुर्याद्विनाशनम्॥ प्रायश्चित्तंयदिप्राप्तंरुद्रवाप्यघमर्षणम्॥ तत्प्रसादोदकंपीत्वाशुद्धिमाप्नोतितत्स्मरणात्॥ उत्पद्यतेजलेपीतेशिववक्त्राद्विनिर्गते॥ उत्साहःपौरुषंशौर्यसंततिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० सुखमुत्तमम्॥ रोगाः सर्वे प्रणश्यन्ति तेजो वीर्यं च वर्धते॥ कर्पूरादिक
६५ संयुक्तं नीरकुंभं निवेदयेत्॥ कल्पान्तं न जलापेक्षां कुर्वन्ति प्र
पितामहा॥ स्कांदे॥ फलानि यच्छते यो वै सुहृद्यानि महेश्वरे॥
कल्याणं जायते तस्य सकलाश्च मनोरथाः॥ विष्णुधर्मोत्तरे॥ पुंग
जातीफले दत्वा जातीपत्रं तथैव च॥ लवंगमथ कंकोलमेलाटक
फलं तथा॥ ताम्बूलक्षारं दत्वा स्वर्गलोकमवाप्नुयात्॥ सौभाग्यम
तुलं लोके तथा रूपमनुत्तमम्॥ गृहाण परमेशान ताम्बूलमिदमुत्तम

ल

एलालवंगकर्पूरपरीकृतमुमापते॥ॐहिरण्यगर्भगर्भस्थंहेमबीजं
विभावसोः॥अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥नीराजनम
हात्म्यम्॥बहुवर्त्तिसमायुक्तंज्वलंतंशंकरोपरि॥कुर्यादाराति
कंयस्तुकल्पकोटिंदिवंवसेत्॥मंत्रहीनंक्रियाहीनंयत्कृतं
पूजनंकिल॥सर्वंसंपूर्णतामेतिकृतेनीराजनेशिवे॥नीराज
नवीधी॥ततोघृतादिसंयुक्तान्पिष्टादिविनिर्मितान्॥पा
त्रापतस्त्रमाकारानुच्चैर्दीपान्प्रदर्शयेत्॥आदायपाणिना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
६६

ध्यायन् मूर्द्धि नीराजयेत् प्रभुम्॥ आरात्रिकमिति प्रोक्तं घंटा
वादनपूर्वकम्॥ नीराज्य पूर्ववद्देवं प्रार्थयेत् प्ररागयाकुलः॥ ॐ स
र्वतो ध्वांतसंहारि विद्योतित दिगंतरम्॥ सौमनस्यप्रदं देव गृहा
णारात्रिकं मम॥ ततस्तु चामरछत्रव्यजनादर्शपूर्वकैः॥ महारा
जोपचारैस्तु तोषयेत्पार्वतीपतिम्॥ ततः पुष्पाञ्जलिं कृत्वा पूर्व
वत्प्रार्थयेत्ततः॥ नानाकुसुमसंभूतं प्रमोदितदिगंतरम्॥ गंधाद्यै
रर्चितं शंभो गृहाणकुसुमांजलिम्॥ इति पुष्पांजलिं दत्वा नमस्कृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्यमहेश्वरम्॥प्रदक्षिणामहात्म्यविधी स्कांदे॥एवंकृत्वातुरुद्रस्य
यःकुर्याद्वै प्रदक्षिणाम्॥सप्तद्वीपवतीपृथ्वीलभतेतुपदेपदे
॥शंभोर्विमानंयःकुर्यात्सकृद्भक्त्याप्रदक्षिणाम्॥अश्वमेधसह
स्रस्यफलंप्राप्नोतिमानवः॥एवंप्रदक्षिणांकृत्वादंडवत्प्रणमेन्मु
दा॥प्रार्थयेद्देवदेवेशंचंद्रचूडंसमाहितः॥शिवप्रदक्षिणाप्रका
रःसंख्याविशेषश्चशिवरहस्ये॥प्रदक्षिणाप्रकारस्तुद्विविधो
वेदसंमतः॥सव्यापसव्यःसव्यश्चतत्राद्यविधिरुच्यते॥वृषंचंडं

वृषंचैवसोमसूत्रंपुनर्वृषम्॥ चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषम्॥
एतत्प्रदक्षिणंप्रोक्तानिस्थानानिनवसत्तम॥ नतान्युल्लंघनीया
निवेदमार्गरतैर्द्विजैः॥ श्रीरायेतानिस्थलान्येवनवस्थानानि
सत्तम॥ तेष्वेवतुविहित्यानवस्थानप्रकल्पनम्॥ एतद्द्विवर
रांगतचैव॥ उपविश्यवृषस्थानेसंकल्प्यविधिपूर्वकम्॥ कृतां
जलिपुटोमौनीचंडस्थानंव्रजेत्ततः॥ पुनर्वृषेशमागत्यसो
मसूत्रंव्रजेत्ततः॥ पुनर्वृषेशमागत्यचंडस्थानंव्रजेत्ततः॥ ततो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हृषेशामप्राप्यसोमसूत्रंव्रजेद्द्विजः॥सोमसूत्रमनुल्लंघ्यचंडस्याना
द्धषंव्रजेत्॥स्थानान्येवंसमाहृत्यहृषभेशंव्रजन्यदा॥प्राप्नुया
न्नियमेनैवतदेकंस्यात्प्रदक्षिणम्॥सव्यापसव्यरूपेस्मिन्वै
दिकेतुप्रदक्षिणे॥प्रदक्षिणाविधिःप्रोक्तोजाबालैरयमेवहि॥
एवंप्रदक्षिणांकुर्यात्प्रत्यहंशंकरालये॥यदत्रमोहाद्व्यत्यासस्त
दास्यादन्यथाध्रुवम्॥शक्तैस्तुसर्वदाकार्यंसव्यासव्यप्रदक्षिणा
म्॥इदंकार्यंप्रदोषेतुशक्तिहीनैरपिद्विजैः॥सव्यासव्यविधाने

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० नप्रदोषेशंकरालये॥प्रदक्षिणात्रयंवापिकर्त्तव्यंनियमाद्द्विजैः॥
६८ शिवालयेभुयःकुर्यात्सव्यासव्यप्रदक्षिणाम्॥सफलंवाजपे
यस्यसंप्राप्नोतिपदेपदे॥सव्यासव्यमितिक्रमोनविवक्षितः
वृषंचंडमितिविपरीतक्रमोपन्यासात्॥सव्यासव्यप्रदक्षिणो
संख्यातत्रैव॥दिवासंध्यासुकर्त्तव्यमेकमेवप्रदक्षिणम्॥इदं
प्रदक्षिणंनित्यंद्विजमात्रस्यसत्तम॥प्रदक्षिणात्रयंकार्यंएवंपं
चदशाथवा॥ऽप्रष्टौद्वादशवाकार्याण्यधिकाण्यपिशक्तितः॥स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यप्रदक्षिणां चतत्रैव॥ सव्यं सव्येन कर्त्तव्यं तदपि श्रुतिनोदितम्॥ तद
पि द्विजन्मा च स्य नित्यमेव न संशयः॥ इदमेकवारं वृषादारभ्य सो
मसूत्रपर्यंतगमनेन सव्यमिति संज्ञां लभत इत्यर्थः॥ शिवप्रदक्षि
णे सोमसूत्रोल्लंघननिषेधात्॥ पुनः पर्यावर्त्तने सव्यापसव्यत्व
प्रसंगात् कैश्चिदिदमेवार्धप्रदक्षिणात्वेन संख्यातम्॥ तथाऽरा
घवभट्टीयाम्॥ तंत्रांतरे॥ एका चंड्यां रवौ सप्त तिस्रो दद्याद्विनायके
॥ चतस्रः केशवे दद्याच्छिवस्यार्धप्रदक्षिणाम्॥ तथा च शिवधर्मे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवप्रदक्षिणोमर्त्यःसोमसूत्रंनलंघयेत्॥लंघनेत्वेकमेकंस्यादलंघ्यं
संयुतंद्वयम्॥प्रदक्षिणोविशेषः॥शिवरहस्ये॥कृतांजलिपुटैरेव
शिवध्यानपुरःसरम्॥प्रदक्षिणांसदाकार्यंमहादेवालयेद्विज
॥वृषचंडसोमसूत्रस्थानानांनियमउक्तः॥शिवरहस्ये॥प्राग्द्वा
रंदेवदेवस्यवृषस्थानंप्रकीर्तितम्॥वृषस्यतुमुखंतेयंशिवाभि
मुखमुत्तमम्॥अत्रप्राग्द्वारमितिप्रसिद्धपूर्वाभिमुखंप्रसिद्धपूर्वं
स्यंचद्वारद्वयमेकहेलयासंगृह्यते॥अग्निमवाक्येषुशिवस्यप्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्मुखत्वप्रत्यज्मुखत्वरूपलिंगोपन्यासात्॥ अनेनशिवस्यदक्षिणो
त्तरमुखस्थापननिषेधोपिसिद्धः॥ तथाच॥ देवस्यनैर्ऋतंस्थानंच
उस्थानंप्रकीर्त्तितम्॥ पश्चिमाभिमुखेलिंगेस्थानमेतदुदीरितम्
॥ पश्चिमाभिमुखेलिंगेसोमसूत्रं शिवस्यतु॥ दक्षस्थानंतुविज्ञे
यमन्यत्रतुनसर्वथा॥ महेशस्योत्तरंस्थानंसोमसूत्रस्यकंस्मृत त्र
म्॥ पूर्वाभिमुखलिंगेतुनियमोयंप्रकीर्तितः॥ केचनात्रशिवरहस्यशा
रदातिलकयोर्हेषस्थानविरोधस्यब्रह्मरागापिदुर्वारत्वान्मतद्वयेनपक्ष

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
७०

भेदंकथयन्ति॥तथापिशिवरहस्यस्यार्थस्यभ्रान्तिसंभवाभावाद्भ्रांते॥
पुरुषधर्मत्वाच्छारदातिलकोक्तवृषभमंगरिटिस्थानव्यत्यासोयु
ज्यतइति प्रतिभातीतिविभाव्यं सुधीरधीभिः॥प्रातःशिवार्चनंकृत्वा
दशाकार्याःप्रदक्षिणाः॥मध्याह्नेतुद्वादशैकादशासायाह्निसादरम्
॥सोमसूत्रमनुल्लंघ्यगर्भेकार्याःप्रदक्षिणाः॥वृषोयदिभवेद्ग
र्भेनोचेत्तत्रनसर्वथा॥सोमसूत्रमनुल्लंघ्यगर्भेसवृषभेपिच॥
विहितंवास्त्वविहितंसोमसूत्रंनलंघयेत्॥बहिश्चापिहितंसूत्रमुल्लं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्यंनैवसर्वथा॥मोहादपिहितंसूत्रमुद्धंध्याप्नोतियातनाम्॥प्र
दक्षिणाष्टकंकार्यमधिकंतुशिवालये॥कृतांजलिपुटैरेव
शिवस्मरणपूर्वकम्॥यानिकानिचपापानिब्रह्महत्यादिका
नि च॥तानीतानिविनश्यंतिप्रदक्षिणांपदेपदे॥पदेपदेसर्वत
मोनिकृंतनंपदेपदेसर्वशुभप्रदायकम्॥प्रदक्षिणांभक्ति
युतेनचेतसाकरोमिमृत्युंजयपार्वतीपते॥नमस्कारमहा
त्म्यविधिःपद्मपुराणे॥अपिपापसमाचारंनरंतुप्रणतंहरे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
७१

त्॥नेक्षंतेकिं करायाम्याउल्लूकास्तंपनंयथा॥प्रणाम्यदंडवद्भूमौन
मस्कारेणयोर्चयेत्॥सतांगतिमवाप्नोतिनयाक्रतुशतैरपि॥शि
वरहस्ये॥एकंविंशतिकर्त्तव्याप्रणामाःपार्वतीपतेः॥एकाद
शाष्टवाष्टौवानातोन्यूनाःकदाचन॥साष्टांगप्रणामलक्ष
णम्॥पद्भ्यांजानुभ्यांकराभ्यामुरसाशिरसातथा॥मनसा
वचसादृष्ट्याप्रणामोष्टांगउच्यते॥नर्त्तनमहात्म्यंलि
ख्यते॥प्रणम्यपरमेशानेकरताउनपूर्वकम्॥यौनृत्यत्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मु

न्वहं भक्त्यासपापेभ्योविंच्यते॥एकवारंनर्तनेनप्रणामेनचशंकरः॥सो
गाग्यमीदृशंमह्यमतिकारुणिकोददौ॥शिवप्रणामनाट्याभ्यांनिरंतर
सुखंमया॥प्राप्तमनेनमयामुक्तिःप्राप्ताव्यासत्यमुच्यते॥स्तुतिलिख्यते॥
शिवरहस्येत्ततीयेंशे॥षण्मुखउवाच॥नमोनमस्तेगिरिशायतुभ्यंन
मोनमस्तेगिरिकंन्यकायै॥नमोनमस्तेवृषभध्वजायसिंहध्वजायैच
नमोनमस्ते॥१॥नमोनमोभूतिविभूषणायनमोनमश्चंदनरूषितायैः न
नमोनमःभालविलोचनायनमोनमःपद्मविलोचनायैः॥२॥त्रिशू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० लहस्तायनमोनमस्ते नमोनमः पद्मलसत्कराये ॥ नमोनमोदिग्वसना

७२ २ यतुभ्यंचित्रांबंये चनमोनमस्ते ॥ चंद्रावतंसायनमोनमस्ते नमोस्तुचं

द्रांभररागान्विताये ॥ नमः सुवर्णांकितकुंडलायनमोस्तुरत्नोज्वल

कुंडलाये ॥ ४ ॥ सुवर्णवर्णायनमोनमस्ते नमः सुवर्णाधिकसुंदरा

ये ॥ नमोनमस्तेत्रिपुरांतकायनमोनमस्ते मधुनाशनाये ॥ नमोन

मस्त्वंधकसूदनायनमोस्तुवेणीफणामण्डिताये ॥ नमोस्तुकर्पूर

रसाकरायनमोलसत्कुंडलमण्डिताये ॥ ६ ॥ नमोस्तुविल्वाम्रफला

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्चितायनमोस्तुकुंदप्रसवार्चितायै॥नमोजैन्मण्डलमण्डनायन
मोमणिभ्राजितमण्डनायै॥७॥नमोस्तुवेदांतगणस्तुतायनमो
स्तुविश्वेश्वरसंस्तुतायै॥नमोस्तुसर्वामरपूजितायनमोस्तुपद्मार्चि
तपादुकायै॥८॥नमःशिवालिंगितविग्रहायनमःशिवालिंगित
विग्रहायै॥नमोनमस्तेजनकायनित्यंनमोनमस्तेगिरिजेजन
न्यै॥९॥नमोनमोनंगहरायनित्यंनमोनमोनंदविवर्द्धनायै॥
नमोनमस्तेस्तुविषाशनायनमोनमस्तेस्तुसुधाशनायै॥नमो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
७३

नमस्तेस्तु महेश्वराय श्रीचंद्रनेदेविनमो नमस्ते ॥ इति ॥ १० ॥ अथ यजु
चुः ॥ वंदे सुराराधितमिंदुमौलिं वंदे भवानीरमणं महेशम् ॥ वंदे म
हामेरुशरासनोरुकोटिप्रभाकूटविघट्टितांगम् ॥ १ ॥ वंदे महानंद
मदप्रदानं विहारलोलं खलु कालकालम् ॥ वंदे पुरश्रीपरिहा
रहेतुं वंदे स्मराराति मुमासहायम् ॥ २ ॥ वंदे तमर्द्धेन्दुकलावतंसं तं
राविहाराकरसंहृतांगम् ॥ वंदे मनोमानसराजहंसं वंदे भवानीस्मि
तमंदहासम् ॥ ३ ॥ वंदे मुकुंदाद्यमरासुराणां वंद्यं च वेदांतगणा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तुतं च ॥ वंदे प्रपन्नार्तिहारं परं तं वंदे मुहुः शंकरमेव वंदे ॥ वंदे जगत्सर्गवि
धानहेतुं वंदे जगत्पालनहेतुमीड्यम् ॥ वंदे जगत्संहरणाक्षमं त्वां
वंदे भवानीमुखपद्मभानुम् ॥५॥ वंदे मुहुः संहृतकालकूटं वंदे
स्मरारिं मदनांतकं च ॥ वंदे विभूतिस्फुरदुन्नतांगं रुद्राक्षमाला
कुलभूषणां च ॥६॥ वंदे तमेवांधकदुर्मदांधमहांधकारप्रलया
नलं तम् ॥ वंदे मुदा तं गिरिराजकन्याकुचांककाश्मीररजःकणां
कम् ॥ ७ ॥ वंदे मुहुः भालविलोचनं तं वंदे त्रिशूलस्फुरदुग्रहस्तम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० वंदेपुनस्तंमृगशावहस्तंवंदेशिवालिंगितवाममागम्॥८॥वंदेचतु
७५ र्वर्गफलप्रदंतंवंदेहयाधीश्वरकेतनंतम्॥वंदेजटाजूटतराभिधा
नविस्रस्तनक्षत्रगणांवृतंतम्॥१०॥शिलादउवाच॥नमोनमस्तेगि
रिजासहायनमोनमस्तेसुकृतस्वरूप॥नमोनमस्तेन्नपतेमहेश
नमोनमस्तेस्तुनमोनमस्ते॥१॥त्वत्पादांबुजभक्तिर्मेनिश्चिला
भवतुप्रभो॥त्वमेवशरणंशंभोगतिस्त्वंजगतांप्रभो॥२॥शिव
रहस्येद्वितीयेंसे॥पुरहरभगवन्कुरुकरुणांस्मरहरशंकर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रभो॥गरधरगुरुभरजगदुद्धारकसुरहरपूजितंपाद॥गजहरय
महरभगमखहरहरिशरहरपाहि॥अगपतिविलसत्तिलिंग
कलांतरभरितानंदकमोद परि फुल्लांबुजविल्वालंकृतश
शिधामोद्यतमौले परिपाहीश्वरशंकरसुंदरभक्तजनप्रिय
शंभो॥उद्यद्धिमकरसमसुमज्जाधिकमारवरांगभूष॥भरि
तालंकृतनिटिलालंकृतपुराड्रोतमपरिभूष चक्षुःश्रवग
णमरिगगणकंधरस्योमार्यमनलाक्षतुरगायितनिगमाव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
७५

यहरश्रुतिमौलौद्यतकीर्त्ते पाहिपाहीश्वरदेवदयाकरभगवन्न
वमांदीनम्॥पुरहरसुरहरपूजितपादशंवरहरहरशंभो॥गंगा
धरहरगरकंधरहरकाकोदरवरहरपरिपाह्य॥घनिशाकर
लोचनदययासुतरांगिरिवास॥इतिशिवरहस्येपार्वतीकृतशि
वस्तुतिःसमाप्ताः॥हरहरपुरहरवितरविमुक्तिंकुरुकरुणांसुरजा
ले॥शरणंभवशरणंभवभव०॥कुरुकुरुकरुणांशशिमौले॥मुरहर
नयनार्चितपदशंकरविधिहरयमहरशंभो शरणंभवशरणंभव०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व०॥परिहरघोरभावांबुधिदुःखंजनिनाशोद्यतमीश शरणं॥निग
मायिततुरगोत्तमशंकरहरिशरपुरहरशंभो शरणं०॥करिवरह
रिवरचर्मवसानसुरवरपोषकदेव॥शरणं म०॥तरुणेंदुद्युतिशो
भितगंगामुकुटीजटातटशंभो॥शरणं म०॥अतिदर्पोद्धतयम
मददर्पखंडनपालितद्विजनृपपते॥शरणं म०॥इतिदेवकृता
शिवस्तुतिः॥जयशंकरचंद्रशेखरप्रमथाधीश्वरं चंद्रचूड॥जयज
यनिगमादिवंद्यपादोज्वलितानलभाललोचनावन जयअजचर्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० शोभितांगजयविश्वविधानमूलपाशो॥जय जयत्रिपुरांतकेश
७६ शंभोजयजयशांतशशांकचारुमौले॥२॥जयजयतटिनीजटो
त्तमांगजयकाकोदरवीरहारशंभो॥गरकंधरभूधरोरुवासत्रि
जगतापहराव्ययेशदेव॥३॥जयजयजगदीशदीनबंधोमधुवैरिप्र
कटाक्षिपूज्यपाद॥जयजयमारहरहरान्तमूलपाशोघ्रयमाधीश्व
रपाहिभीतितोघ्नः॥४॥जयजयविबुधार्तिनाशलोकजयजय
भस्मविभूषरोषतुष्ट॥प्रसभंकष्टमपाकुरुष्वशंभोगिरिजानाथ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सनाथयथाम्भुनः॥४॥इतिदेवकृताशिवस्तुतिः॥श्रीशंकरप्रियकराम
लवेदगीतविष्णंबुजार्चितमहाजननिमेश्वरत्वम्॥पाहीशमामक
धियाशशिखराडमौलेभक्तांत्वनन्यकरुणागारसर्वाक्षरोगन॥१॥
हेशंकरस्मरहरांधकसूदनेशविश्वेशभर्गभगनेत्रनिशातनाथ
॥पाहीशा०॥२॥गंगाधरप्रमथनाथपिनाकपाणोमार्त्तंडनंदनरहह
राव्ययदीनबंधो॥पाहीशा०॥३॥षड्वक्त्रसिंधुरवराननुनंदितेंदुनेत्रो
रुलोकनमहेश्वरदक्षशीक्ष॥पाहीशा०॥४॥इतिपार्वतीकृतशिवस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
७७

त्तिः॥हिमवानुवाच॥शशिधरगरधरमारहराव्ययशंभोगगणनाती
तगुणाप्रक्रक्वदेव॥तवलिंगसुपूजनान्मनोमेनकदान्यत्रगतीष्ठुभावया
मि॥१॥त्र्प्रगजाननपाथोजविकासनदिवाकरम्॥विघ्नाद्रिकुलिशंश्री
मदेकदंतंनमाम्यहम्॥२॥शिवरहस्येनवमेंशे॥नीलकंठउवाच॥न
मोस्तुतेदेवदयानिधेहरप्रपन्नापालाव्ययसोममौले॥व्यालोलमा
लामलहस्तशूलमांपाहिसर्वेश्वरकालकाल॥१॥पाहीशेंदुकला
ललानभगवन्श्रीकंठकंठीरवोदुग्धच्चर्मधराव्ययेशभगवन्मां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पाहिसर्वेश्वर॥ब्रह्माद्यच्युतवंद्यपादसुमहानागांगगौरीमुखाद्युत्फुल्ला
ब्जविकासनार्क भगवन्मांपाहिसर्वेश्वर॥१॥पार्वतीउवाच॥शंभोर
सालवरमूलगहस्तभूलव्यालांगमालजितकामललामसोम॥गं
गाविशालतरचुंचिजटालवालश्रीकंठमूलभजतामघहारिशी
ल॥एकाम्रमूलनिलयंभुजगाधिराजराजत्किरीटवर्वैयंसदयं ल
सदैव॥अत्यंतमेवभजमानजनांतरंगेनृत्यंतमाशुगिरिशंप
रिशीलयामि॥एकाम्रमूलनिलयायदयालयायसंसारघोरव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
७८

हरणालयतारणाय॥तापत्रयोपशमनायसकृन्नतानांलोकत्रयैक
विभवेकरवैनमस्याम्॥३ पायंपायंनेत्रपात्रैस्त्रिनेत्रंनामंनामंश
स्वदुन्नम्यहर्षात्॥हायंहायंदुःखजातंविशेषंत्वत्पादाब्जालोक
नेनैवकालम्॥४॥शंभोभर्गभवांतकाव्ययविभोपाद्यप्रसुजाते
क्षराण लोक्यामौलिसमूलभालविलसन्नेत्रप्रभाभासित॥ग्रू
लोलद्युतिसोमसुंदरजटा — — जंगंगोत्तमव्यालानद्धशरीरकां
तगलजितस्मीरंजितांगप्रभो॥वैश्यउवाच॥भोशंभोत्रिजगच्छ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रगायकरुरागातारुरायवरांनिधे॥पाहीशप्रमथाधिनाथगरधकृविश्वे
शविश्वाधिक॥विश्वाशास्यविभोविभूषरामहाकाकोदरकंधरं
सोमानद्धकिरीटकोटिविलसद्भुसंगरागारुरा॥१॥शिवरहस्ये
॥त्वद्रोहतस्परजनेषुनमेस्तुसंगः त्वद्रोहिसंगतममेशनदे
हिपुत्रम्॥त्वन्नामशून्यमपगच्छतुवाकूपटुत्वंत्वध्यानपावि
तमिदंममचित्तमस्तु॥स्तुतिसमाप्ताः॥शिवरहस्ये॥श्रीपंचाक्ष
रीमाहात्म्यम्॥दधिमंथनसंप्राप्तनवनीतनिभंविदुः॥पंचाक्षरी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
७८

महामंत्रंवेदराशिविनिर्गतम्॥१॥ मंत्रेष्वयंशांभवमंत्रराजराजाधिराजः खलुशैवमंत्रः॥अतःसएवामितपुण्यसेतुसएवमोक्षायविनिर्मितोपि॥२॥ पंचाक्षराकारसुधासमुद्रंभत्वामहारुद्रमिवापरंतम्॥३॥कोवानतन्मंत्रजपानुरक्तस्त्यक्तापमृत्युःकृतपापराशिः॥३॥वेदैःपरमयंमंत्रोजप्तोपंचाक्षरीपरः॥महेश्वरेणजप्तोयंजप्तोप्ययंविकया मुदा॥४॥षडक्षरेणमंत्रेणपुष्पमेकंविशिष्यते॥लिंगस्यमूर्द्धि योदत्तेनसैयोभिजायते॥५॥अयंमंत्रःपरोमंत्रोजप्तोपंचाक्षरः

भू

परः॥मंत्रराजाधिराजोयंमंत्ररत्नमितिस्मृतः॥६॥प्राप्यशांभवीं
विद्यांतनुत्यागंकरोतुयः॥समुक्तोनभवत्येवशिवभक्तोपिवस्तु
तः॥७॥भवपाशनिबद्धानांदेहिनांहितकाम्यया॥प्राहोन्नमः
शिवायेतिमंत्रमाद्यंशिवःस्वयम्॥८॥मंत्रराजाधिराजोयंसर्व
वेदांतशेखरः॥सर्वज्ञाननिधानंचसोयंशैवःषडक्षरः॥९॥स्त्री
भिःशूद्रैश्चसंकीर्णैर्धार्यतेमुक्तिकांक्षिभिः॥नास्यदीक्षानहोम
श्चनसंस्कारोनतर्पणम्॥१०॥नकालोनोपदेशश्चसदाशुचिरयं

शि०व० मतः॥शिवपञ्चाक्षरोजप्योयद्वान्यासादिकंविना॥ मुक्त्वापुनःप्रयत्नेन
८० नजपनीयःषडक्षरः॥सदाचारविहीनस्यपतितस्यांत्यजस्यच॥
पञ्चाक्षरात्परंनास्तिपरित्रातांकलौयुगे॥महापापैरपिस्पृष्टोदेहांतेयस्तुमांस्मरेत्॥ पंचाक्षरीचोच्चरतिसमुक्तोनात्रसंशयः॥
अप्ययपञ्चाक्षरजपःसहस्रंवातदर्द्धं वातदर्द्धं वाजपेन्मनुमिति
शिवपुराणे॥शिवरहस्ये॥शिवपञ्चाक्षरोमंत्रःसर्वमंत्रोत्त
मोत्तमः॥नैतस्मादधिकोमंत्रोवेदमंत्रेषुदृश्यते॥शिवपञ्चा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षरो मंत्रो वैदिको वेदसंमतः॥ वेदेषु पठ्यते तद्वद्देदांतेष्वपि पठ्यते॥ श्री पञ्चाक्षरजपविधौ शिवगीतायाम्॥ पर्वताग्रे नदीतीरे बिल्वमूले शिवालये॥ अग्निहोत्रे केशवस्य सन्निधौ तु जपेत्तु यः॥ नैवास्य विघ्नं कुर्वन्ती दानवा यक्षराक्षसाः॥ तन्न स्पृशंति पापानि शिवसायुज्य माप्नुयात्॥ सर्वान्कामानवाप्नोति मनुष्यः कंबलासने॥ कृष्णाजिने भवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्मणि॥ कुशासने भवेज्ज्ञानमारोग्यं यत्र विनिर्मिते॥ प्राङ्मुखोदङ्मुखो वापि जपं पूजां समाचरेत्॥ पाषाणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दुःखमाप्नोतिकाष्ठेनानाविध्यान्नादान्॥वस्त्रेश्रियमवाप्नोतिभूमौमंत्रो
नसिध्यति॥अक्षमात्राविधिंवक्ष्येश्रुणुष्वावहितोनृप॥साम्राज्यंस्फा
टिकीदद्यात्पुत्रजीवपरांश्रियम्॥आत्मज्ञानंकुशग्रंथोरुद्राक्षःसर्व
कामदः॥प्रवालैश्चकृतामालासर्वदेववशप्रदा॥मोक्षप्रदाचमालास्या
दामलक्याःफलैःकृता॥मुक्ताफलैःकृतामालासर्वविद्याप्रदायिनी॥
माणिक्यरचितामालात्रैलोक्यंस्त्रीवशंकरी॥नीलैर्मरकतैर्वापिकृ
ताशत्रुजयप्रदा॥सुवर्णरचितामालादद्याद्धेमहतींश्रियम्॥तयारौ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्यमयीमालाकन्यांयच्छतिकामिनाम्॥उक्तानांसर्वकामानांदायिनी
पारदैःकृता॥अष्टोत्तरशतंमालातत्रस्यादुत्तमोत्तमा॥शतसंख्यो
त्तमामालापंचाशान्मध्यमामता॥चतुःपञ्चाशतायद्वाअधमास
प्तविंशतिः॥अधमापंचविंशत्यायदिस्याच्छतनिर्मिता॥पंचाशद
क्षरारायत्रानुलोमप्रतिलोमतः॥इत्येवंस्थापयेत्सर्वांनकस्मैचि
त्प्रदर्शयेत्॥वर्णैर्विन्यस्तयायस्तुक्रियतेमालयाजपः॥एकवारे
णातस्यैवपुरश्चर्याकृताभवेत्॥सव्यपार्ष्णिंगुदेस्थाप्यदक्षिणांभू

CC-0. Jangamwadi Math Collection: Digitized by eGangotri

शिव० द्विजोपरि॥योनिमुद्रांबंधयेदेवंभवेदासनमुत्तमम्॥योनिमुद्रासनेस्थि
८२ त्वाप्रजपेद्यःसमाहितः॥यत्कंचिदपिवामंत्रंतस्यस्युःसर्वसिद्धयः॥
छिन्नारुद्धास्तथाभीतामिलीतामूर्छितास्तथा॥सुप्तामत्ताहीन
वीर्यादग्धात्रस्तारिपक्षकाः॥बालायौवनमत्ताश्चवृद्धामंत्राश्चये
मताः॥योनिमुद्रासनेस्थित्वामंत्रानेवंविधान्जपेत्॥तस्यसिध्यं
तितेमंत्रानान्यस्यतुकथंचन॥ब्राह्म्यंमुहूर्त्तमारभ्यमध्याह्नंप्रज
पेन्मनुम्॥अतऊर्ध्वंकृतेजाप्येविनाशोभवतिध्रुवम्॥पुरश्चर्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विधावेवंसर्वकाम्यफलेष्वपि॥नित्येनैमित्तिकेवापितपश्चर्यासु
वासुनः॥सर्वदेवजपःकार्योनदोषस्तत्रकश्चन॥शिवस्तोत्रलि
ख्यते॥नमोहरायदेवायत्रिनेत्रायत्रिमूलिने॥तापसायमहेशायत
त्वज्ञानप्रदायिने॥१॥नमोमौंजायशुभ्रायनमःकारुरायमूर्त्तये॥
नमोदेवादिदेवायनमोवेदान्तवेदिने॥२॥नमःपरायरुद्रायसुपा
रायनमोनमः॥विश्वमूर्त्तेमहेशायविश्वाधारायतेनमः॥३॥नमो
भक्तभवछेदकाररगायामलात्मने॥कालायकालरुद्रायकालातीता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० यतेनमः॥४॥जितेंद्रियायनित्यायजितक्रोधायतेनमः॥नमःपाखरा ऽ
८२ भंगायनमःपापहरायच॥५॥नमःपर्वतराजेंद्रुकन्यकापतयेनमः॥
योगानंदाययोगाययोगिनांपतयेनमः॥६॥प्राणायामपराणां
नुप्राणरक्षायतेनमः॥मूलाधारप्रविष्टायमूलदीपायतेनमः॥७॥स
च्चिदानंदपूर्णायनमःसाक्षात्परात्मने॥नमःशिवायाद्भुतविक्रमाय
तेनमःशिवायाद्भुतविक्रमायते॥नमःशिवायाखिलनायकायतेनमः
शिवायामृतहेतवेनमः॥यइदंपठतेनित्यंस्तोत्रंभक्त्यासुसंयतः॥तस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुक्तिःकरस्थास्याच्छंकरप्रियकारणात्॥विद्यार्थी लभते विद्यां विवा
हार्थी गृही भवेत्॥वैराग्यकामो लभते वैराग्यं भवतारकम्॥तस्मा
द्दिने दिने यूयमिदं स्तोत्रं समाहिताः॥पठन्तु भवनाशार्थमिदं हि
भवनाशनम्॥इति सूतसंहितायां ज्ञानखण्डे द्वितीयोऽध्यायः॥ज
यदेव परानंद जय चित्सत्यविग्रह॥जय संसाररोगघ्न जय पापहर प्रभो
॥जय पूर्ण महादेव जय देवारिमर्दन॥जय कल्याण देवेश जय त्रिपुर
मर्दन॥जयाहंकारशत्रुघ्न जय मायाविषापह॥जय वेदांतसंवेद्य जय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० वाचामगोचर॥जयरागहरस्वेच्छजयद्वेषहराग्मज॥जयसांवसदाचा
८४ रजयसर्वसमुद्भव॥जयब्रह्मादिभिःपूज्यजयविष्णोःपरात्परः॥ज
यविद्यामहेशानजयविद्याप्रदानिश॥जयसर्वांगसंपूर्णनागा
भरणभूषित॥जयब्रह्मविदांप्राप्यजयभोगापवर्गद॥जयका
महरप्राज्ञजयकारुणयविग्रह॥जयभस्ममहादेवजयभस्माव
गुंठित॥जयभस्मरतानांचपाशभंगपरायण॥जयहृत्पंकजेनि
त्यंयतिभिःपूज्यविग्रह॥सूतउवाच॥इतिस्तुत्वामहादेवंप्रणिपत्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हृहस्पतिः॥ कृतार्थक्लेशानिर्मुक्तो भक्त्यापरवशो भवेत्॥ यइदं पठ
तेनित्यंसंध्ययोरुभयोरपि॥ भक्तिपारंगतोभूत्वापरंब्रह्मावगच्छ
ति॥ गंगाप्रवाहवत्तस्यवाकूविभूतिर्विजृंभते॥ हृहस्पतिसमोवुध्या
गुरुभक्त्यामयासमः॥ पुत्रार्थीलभतेपुत्रंकन्यार्थीकन्यकामियात्॥
ब्रह्मवर्चसकामस्तुतदाप्नोतिनसंशयः॥ तस्माद्भवद्भिर्मुनयःसंध्ययो
रुभयोरपि॥ जप्यंस्तोत्रमिदंपुरायंदेवदेवस्यभक्तितः॥ इतिश्रीसूत
संहितायांएकादशोध्यायः॥ ०॥ जयशंकरपार्वतीपतेमृडशंभोशशि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० खण्डमंडन॥ मदनांतक भक्तवत्सल प्रियकैलास दयासुधांबुधे॥ सदु
८५ पायकथास्वपण्डितो हृदये दुःखशरेण खण्डितः॥ शशिखण्डशि
खण्डमण्डनं शरणं यामि शरण्यमीश्वरम्॥२॥ महतः परितः प्रस
र्पतस्तमसो दर्शनभेदिनोभिदे॥ दिननाथ इव स्वतेजसा हृदयव्यो
म्नि मनाग् उदेहि नः॥३॥ न वयं तव चर्मचक्षुषा सकलेनेश विलोकया
मुनः॥ पदवीमप्युपवीक्षितं क्षमाः॥ कृपया भयदेन चक्षुषा॥४॥ त
दनुस्मृतिरेव पावनी स्तुतियुक्ता नहि वक्तुमीश सा॥ मधुरं हि पयः स्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भावतोननुकीदृक्सितशर्करान्वितम्॥५॥सविषोप्यमृतायतेभवान्शा
वमुण्डाभरणोपिपावनः॥भवएवभवांतकःसतांसमदृष्टिर्विषमेक्षणो
पिसन्॥६॥अपिमूलधरोनिरामयोदृढवैराग्यरतोपिरागवान्॥अ
पिभैक्ष्यचरोमहेश्वरश्चरितंचित्रमिदंहितेप्रभो॥७॥वितरत्यपिवांछि
तंदृशापरितुष्टःकिलकल्पपादपः॥हृदयेस्मृतएवधीमतेनमतेभीष्ट
फलप्रदोभवान्॥८॥सहसैवभुजंगपाशवान्विनिगृह्णातिनयाव
दंतकः॥अभयंकुरुतावदाशुमेगतजीवस्यपुनःकिमौषधैः॥स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विषैरपि भीमपन्नगैर्विषयैरेभिरलं परिक्षितम् ॥ भ्रमतैरिव संभ्रमे
णामामभिषिंचाशु दयावलोकनैः ॥१०॥ मुनयो बहवोऽद्य धन्यतां
गमिताः स्वाभिमतार्थलाभतः ॥ करुणाकर येन तेन मामवसंतं ननु
पश्य चक्षुषा ॥११॥ प्रणमाम्यथ यामि चापरं शरणं कं कृपणाभय
प्रदम् ॥ विरहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत् ॥१२॥
बहवो भवतानुकंपिताः किमितीशान न मानुकंपसे ॥ दधता किमु
मंदराचलं परमाणुः कमठेन दुर्धरः ॥१३॥ अमुचिंयदि मानुमन्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेकिमिदंमूर्द्ध्निकपालदामते।।उतषाह्यमसाधुसंनिनंविषयलक्ष्मा
सिनकिंद्विजिह्वधक्।।१४।।क्वदृशंविदधामिकिंकरोम्यनुतिष्ठामि
कथंभयाकुलः।।क्वनुतिष्ठसिरक्षरक्षमामयिशंभोशरणागतो
स्मिते।।१५।।विलुठाम्यवनौकिमाकुलःकिमुरोहन्मिशिरश्छिनद्मि
वा।।किमुरोदिमिरारटीमिकिंकृपणांमांनयदीक्षसेप्रभो।।१६।।शि
वसर्वदशर्वकामदप्रणतोदेवदयांकुरुष्वमे।।नमईश्वरनाथदि
क्पतेपुनरेवेशनमोनमोस्तुते।।१७।।शरणंतरुणेंदुशेखरःशरणं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० मे गिरिराजकन्यकाः॥ शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम्
२७ ॥१८॥ उपमन्युकृतं स्तवोत्तमं प्रजपेद्यस्तु शिवस्य संनिधौ॥ शिवलो
कमवाप्य सोऽचिरात्सह तेनैव शिवेन मोदते॥ इत्यनुशासनपर्वणि
उपमन्युकृतं शंकरस्तोत्रं संपूर्णम्॥ प्रार्थना लिख्यते॥ प्रार्थयेदं
जलिं कृत्वा मूर्ध्नि भक्तिपुरःसरम्॥ प्रसीद गिरिजानाथ करु
णारसवारिधे॥१॥ अनाथ देवदेवेश शरणागतवत्सल॥ तारय
स्व महादेव संसाराब्धेरगाधतः॥२॥ कृपानिधान सर्वज्ञ सर्वदेव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिखामरो॥त्वदियोहंमहादेवत्वदन्यंनभजाम्यहम्॥३॥त्वदन्यंनव
दामीशात्वदन्यंननमाम्यहम्॥पितात्वमेवगौरीशमाताभ्राताच
मेप्रभो॥४॥सर्वंत्वमेवसर्वस्वंत्वमेवपरमेश्वर॥श्चरणोस्मित्वत्कृ
पामेवशंभोसर्वश्रुतिश्रुताम्॥तवैवनामवक्ष्यामिभुक्तिमुक्ति
प्रदायकम्॥भवंतमेवसततंपूजयामिसदाशिव॥६॥त्वदन्यं
नार्चयिष्यामिस्वप्नेपिपरमेश्वर॥त्वत्पादपद्मप्रणतंचित्तम
स्तुममप्रभो॥७॥त्वदन्यचिंतनाच्चित्तंपराहृत्तंशिवास्तुमे॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
८८

त्वय्येवसर्वभावेनचित्तंनमस्तुमहेश्वर॥८॥त्वय्येवसर्वभावेनचि
त्तंनमस्तुमहेश्वर॥८॥त्वदन्यंशरणंनास्तित्वमेवशरणंमम॥
रक्षरक्षमहादेवरक्षरक्षशिवापते॥९॥त्वदीयंपादकमलंद
त्तमद्यमयाशिव॥धन्योस्मिकृतकृत्योस्मिमनोधन्योनवि
द्यते॥१०॥त्वदीयंपादकमलंनिधेहिममसुर्द्धनि॥येनध
न्योभवाम्यद्यधन्यंकुरुसदाशिव॥११॥नत्वदन्योमहादेव
लोकनाथोजगन्मय॥नत्वदन्यःसुराराध्योनत्वदन्योजग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्प्रभुः॥१२॥नत्वदन्योवेदवेद्योनत्वदन्यःसुरेश्वरः॥नत्वदन्यःसदा
सेव्योनत्वदन्योऽजगत्पिता॥१३॥त्वमेवभूषरांरम्यंत्वमेवममम
जीवनम्॥त्वमेवममभ्राता सित्वमेवहिपिताममम॥१४॥त्वमा
राध्यतमःशंभोममदेवोत्तमप्रभो॥नत्वदन्यपदद्वंद्वमर्चया
मिकृपानिधे॥१५॥नस्मरामिकथामन्यांशिवनामविवर्जित
म्॥शिवनामान्यनामानिनवदामिमहेश्वर॥१६॥वेदैःसर्वैरपि
श्रीमंस्तत्वरूपंसदाशिव॥नज्ञातंतादृशंरूपंमयाज्ञेयंकथंप्रभो॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१७॥ अनालोच्यास्मदीयानि चरित्रानि महेश्वर॥ विष्ण्वादिदेवता मा
न्यान्कुरु नत्स्वद्गुणान्प्रभो॥१८॥ दिनमध्ये सकृद्येतां प्रणामं तिहि
सादरम्॥ पापिष्ठा अपितेशंभो प्रयान्तितवमंदीरम्॥१९॥ इति
विज्ञायवात्सल्यं गरिष्ठं ते कृपानिधे॥ वयं पापस्वभावास्त्वां प्रप
न्नाः साम्बशंकर॥२०॥ अतः परं महेशान दयास्मासु त्वया वि
भो॥ कर्त्तव्या सत्वरं शंभो भक्तवंधो विकापते॥२१॥ यद्यस्माकं
महादेव निवृत्तिः पापतः प्रिया॥ तर्हि ब्रूहि तथा शंभो मकुर्मः पात

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कं प्रभो ॥२२॥ यतो न सहसे पापमस्माकं करुणानिधे ॥ हेतुं तमपि विश्वेश व्रूह्यग्रे नः प्रभो हर ॥२३॥ पापाब्धयोपि विश्वेश तारिता वहवस्त्वया ॥ अस्माभिरेव गौरीश ह्यपराद्धं किमीश्वर ॥२४॥ विषमेक्षण तास्मासु सार्थकीकर्तुमिच्छसि ॥ त्वं चेत्सांव किमस्माभिः कर्त्तव्यं हि महेश्वर ॥२५॥ महादेव महादेव महादेव महेश्वर ॥ भवानेव भावनेव भवानेव गतिर्मम ॥२६॥ अतः परं केवलमिंदुमौले त्वत्पादपद्मस्मरणानुरक्तिः ॥ विरक्तिरप्यंवुजलोकवासेप्यस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० स्मरारेस्मरविश्वनाथ॥२७॥दयनीययमोस्मितेदयामयितावत्प्रसन्ना
९० यदिक्षराणाम्॥कृतदातवहानिरातुरे हरहरेकुरुसादरंदया॥२८॥महे
शाद्ययाचेभवत्पादपद्मेदृढांभक्तिमेकांत्वदन्यंनयाचे॥त्वमेवा
सिमातापितासित्वमेवप्रभुर्मेत्वमेवासिबंधुस्त्वमेव॥२९॥शिव
श्रीमहादेवगौरीपतेमांत्वदीयंनयापारंसंसारपारम्॥भवंतं
विनाकोपिपातानमेस्यान्नमातापितावानबंधुर्महेश॥३०॥
दृढाभक्तिरीशानपादारविंदेममास्त्वस्तुनित्यंममास्त्वस्तुसा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मे॥समर्थोहि धर्मार्थकामप्रदानेतथामोक्षदानेसमर्थोमहेश॥ ०
३१॥मन्नेत्रांबुजक्लृप्त्यमस्तुसततंबिल्वादिकाभ्यर्चिता॥पारानंत
विहारतुंगविलसद्दिंगार्चनालोकनम्॥तेनैतज्जननंचधन्यमितिमे
बुद्धिःप्रवृद्धामुहुर्भूयादित्यनुवासरंभवतुमेसंप्रार्थितंशंकर॥३२॥त्व
त्पादांबुरुहार्चनेनमतिरुमाकान्तास्तुमेसर्वदात्वन्नामस्मरणेपिमेशि
वशिवेपञ्चाक्षरावर्तने॥लिंगेमंगलदायकेपिभसितेरुद्राक्षमा
लास्वपिस्वामिन्शंकरसेवनेपिसततंहारोपहारेष्वपि॥३३॥काल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० कालसुरवंद्यशंकरव्यालमालगरनीलमहेश॥व्योमकेशशशिचूडव्य
८१ क्षमांपक्षपातजदृशापरिपाहि॥३४॥त्रिदशाधिपभूतिभूषणात्रिपुरा
रेमुरवैरिपूजितांघ्रे॥कुरुमामकतामतिंक्षरांमयिनित्यंकलयेमहे
श्वरम्॥३५॥भवत्पादपद्मप्रियासाकमेकन्ममःक्रीडतीतिप्रमो
हेममासौ॥ततस्तावताहानिरीशानकांतेतवाहंतावहंतवाहंतवा
हम्॥३६॥अपराधनिवेदन॥०॥निर्माल्यंपरमंज्ञानंनिर्माल्यं
शुद्धशेवदम्॥निर्माल्यंपरमानंदंनिर्माल्यंपरमामृतम्॥१॥नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मैलत्वाच्च निर्माल्यं नराणां नैर्मल्यकारणात्॥ निर्माल्यधारणं शंभोः
प्रसादोदकसेवनम्॥२॥ प्रसादभोजनं चेति प्रत्येकं पातकापहम्॥ शि
रसा शिवनिर्माल्यं भक्त्या यो धारयेत्सकृत्॥३॥ अशुचिर्भिन्नमर्या
दः सर्वावस्थां गतोपि वा॥ तस्य पापानि घोराणि नाशयत्येव शंक
रः॥४॥ निर्माल्यधारणात्पुत्राः सालोक्यं लभते नरः॥ स्नानोदक
स्य पानेन सामीप्यं लभते सदा॥५॥ शिवप्रसादभोगेन सारूप्यं प्र
तिपद्यते॥ शैवे शिववाक्यम्॥ किं दीक्षया किं तपसा किं ध्यानेन ज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० पेनकिम्॥ अरायुदेविवरारोहेमद्भुक्तं यदि भुज्यते॥ शिरसाधारयेद्भ
९२ क्त्यायोनिर्माल्यमलोभतः॥ अहमेव धृतस्तेन सोमःसोमकला
धरः॥ मदीयभुक्तं नैवेद्यं स्नानं वा कुसुमं मलम्॥ धर्ममर्थं च का
मं च मोक्षं च दद्दते क्रमात्॥ लैंगे॥ शिवस्यैव तु निर्माल्यं भक्त्या धा
र्यं द्विजातिभिः॥ न तान्स्पृशन्ति पापानि मनोवाक्कायजानि च॥ नि
र्माल्यसलिलं प्राप्य देवदेवस्य शूलिनः॥ क्षयकुष्ठज्वरश्वासैर्मुच्य
ते किल्बिषैरपि॥ इति॥ निर्माल्यं मस्तके धार्यं मूलमंत्रेण मंत्रिणा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्तु शंकरनिर्माल्यं पादेनाक्रमते नरः ॥ षष्ठिवर्षसहस्राणि तिर्य
ग्योनिषु जायते ॥ शिवरहस्ये ॥ रहस्यमन्यद्वक्ष्यामि यत्र मे रम
ते मनः ॥ तदेव विद्धि नंदीश कैलास इति सादरम् ॥ गौरीशरी
रे रमते मम मच्चित्तमनुत्तमम् ॥ काश्यां शांभवचित्तेपि तदन्य
त्र न सर्वथा ॥ त्रिष्वप्यत्युत्तमं मन्ये केवलं शांभवं मनः ॥ तत्रानं
दो यथा तद्वदानंदो यत्र कुत्र वा ॥ कल्पितेव रुधा पूजा शांभवेन
प्रतिष्ठिताम् ॥ तच्चिते या दृशं सौख्यं तन्न क्वापि मनोहरम् ॥ मंदि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० रंशांकराकारं दृश्यते नंदिकेश्वर॥ समद्धं सदनं न्यक्का धन धान्यादिभि
९३ र्नरः॥ अन्यत्र याति किं लोके तथा तत्त्यजते कथम्॥ गोर्यो सहवि
हारार्थे पुष्पप्रासादकल्पना॥ कियते तेन सततं तत्त्यागे मतिरेव न
॥ शरीरे यादृशी प्रीतिर्मदीये मम सर्वथा॥ ततोप्यत्राधिका प्रीतिः
शांभवे विग्रहे सदा॥ नंदीशं मान्यो न्यो न शिवार्चकादिति मतिर्ध
न्यस्य संजायते पुण्यानां परिपाकतः॥ कथमपि प्रायः स धन्योत्त
मः॥ लोके दुर्लभ एव शांभव इति प्रामाणिकानां वचो वीचीसं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चरतिप्रभाकरकराकारातमोनाशिका॥ लोकेदुर्लभएवशंभवइति
ज्ञात्वातिपुण्यार्जितैर्लब्धश्चेद्भुविशंभवः सविभवैरभ्यर्चनीयो
मुहुः॥ मोहात्तद्धजनंत्यजेद्यदितदास्याद्दुर्भगोदुर्भगातन्माता
जनकोपिदुर्भगइतिस्तेयोपितस्यध्रुवम्॥ शंभुःशंभवजिह्वयार
समयंगृह्णातिनैवेद्यमित्यन्नंशंभवपुंगवायविविधंदेयंतदा
राधनात्॥ स्यादाराधितएवतेनसमहादेवोतितुष्टः सदातंपु
ष्णातिधनादिभिर्वितनुतेतंमुक्तिकांतामपि॥ किंतद्वदशिरो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ८४

विचारनिरतस्वान्तेनतीर्थोदकस्नानेनापितपस्ययाशिवपुरीवा
सेनयागैरपि॥योगैर्वानियमेनशंभवपदांभोजार्चनेनैवेन्न
तैराहृतैरपिकोटिशोपिनफलंस्वर्गापवर्गादिकम्॥भाग्यंतस्य
तदित्यवैमिवहुधायेनार्चितःशंभवःसंतुष्टोनिलयःशिवस्य
सुतरामंवासमेतस्यसः॥तस्मादप्यधिकोनकोपिभुवनेष्वित्याद
रादन्वहंतंदध्याप्रणामंतिपुरायनिचहैःसिद्धामुनींद्राऽप्यपि॥स्था
वरस्यापिलिंगस्यपूजांकृत्वाततःपरम्॥तदर्पितेनहारेणाकर्त्तव्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हारतोषरणाम्र॥ भुंक्तेहारमुखंप्राप्यसदारोहरइत्यपि॥ स्तुतिस्तुता
ततोहारंहाराहारेवरंविदुः॥ येषांनहाररूपेषुलिंगेषुचदृढाम
तिः॥ तैरर्चनीयंतल्लिंगंस्थावरंगिरिगह्वरे॥ हारांतःकरणाकार
गुहामाश्रित्यशंकरः॥ तिष्ठतीत्येवगंतव्यंसागुहावेदबोधिता॥
तस्यांगुहायांसंविष्टंज्ञप्रम्विकारमरांप्रभुं॥ स्मृत्वाहर्षाश्रुधारा
भिःधीरोहारोहृतोभवेत्॥ यथाधिकारंलिंगार्चाकृत्वापापैःप्र
मुच्यते॥ यथाविद्भ्मैतस्यपूजाकार्याविशेषतः॥ शिवस्वयदाद

व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० सच्चिदानंदघनस्तदा॥ तदर्चनपरो भूयात् नलिंगार्चनतत्परः॥ शि
८५ वसंनिधिरित्येवलिंगेपूजाविधीयते॥ सचतत्संनिहितः साक्षात
कार्यंतस्यैवपूजनम्॥ यत्रभुंक्तेशांभवस्तुशिवोभुंक्तेचतत्र
वै॥ पूज्याः सदादानमानैस्तेनप्रीतोभवेच्छिवः॥ यत्रशांभव
पादाब्जरजोलेशः पतिष्यति॥ तत्रतिष्ठतिगौरीशः शिपिविष्टोति
हर्षितः॥ शांभवानांहिपादाब्जरजोलेशोपिदुर्लभा॥ तेशांभवाः
सखायोमेभाग्यवान्कोस्तिमादृक्षा॥ अहोमेपरमंभाग्यंयतः शां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भवपुंगवाः॥दयाकुर्वंतिसततंममप्रेमपुरःसरम्॥सर्वज्ञोसिमहादे
वजानासिममहद्गतम्॥शंभवेसुकथंप्रेमत्वंतद्रक्षनमोस्तुते॥लो
केशंकरसंगतिःखलुसदासायंशिवाराधनध्यानायप्रभवत्यव
श्यमसक्तसंगतेस्तत्फलम्॥सायस्यास्तिसएवभाग्यनिवहाधा
रःसुराराधितस्तस्मात्वांबुजपूजनेनभगवान्भालेक्षणःतुष्य
ति॥कःशंभवेनसदृशोहितवज्ञात्जगत्त्रये॥तेननतंत्वयथात्ता
त्ततथानान्येनकेनचित्॥शिवंशिवंकरत्वेनज्ञात्वाकेवलम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
२८६

ध्यम्॥सर्वमन्यत्परित्यज्य निरातंकोधितिष्ठती॥शिवनामसुधाश
नेनधन्याःकतिचित्तेगिरिजेममापिमान्याः॥इदमादरतोतिगो
पनीयंमरिरेवायमहोमहान्सशैवः॥यःपश्यतिस्मरहरप्रिय
लिंगपूजांभक्त्याप्रमोदमुपयातिविलोचनेन॥रोमांचचविह्नि
ततनुःस्मृतचंद्रमौलिस्तंशंभवंविदुरघांवुधिनाशहेतुम्॥
जारोजातुचजारिंब्बनुरतस्तस्माद्विरक्तोयुवानस्याज्ञांतहरागीं
प्रपश्यतिमुहुस्त्यक्त्वापिकार्यांतरम्॥तद्वद्यःशिवलिंगपूजनर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तोदूर्वांकुराद्यैर्मुदावारंवारमदृष्टिभेदघटितःशांगःसलोकोत्तरः
॥सएवतावत्परमास्तिकश्चसएवतावद्भुविपावनश्च॥यःशांक
रंनाममुहुर्मनःस्थंकृत्वास्मरत्यन्वहमादरेण॥शैवद्विजवरेद
प्र त्तंधनमल्पमपिभो॥प्रवर्द्धतेनसंदेहोमेरुवत्तद्दिनेदिने॥शैवपा
त्रवरंत्यक्त्वादत्तमन्यत्रतद्धनम्॥प्रत्यहंरोदनंकृत्वा [illegible] तत्रदुः
खेनतिष्ठति॥शैवंकथंविहायात्रदत्तंपातकिनाधनम्॥इति
दुःखंविहायैवततोनश्यतितद्धनम्॥विष्णुभक्तसहस्रेभ्योरुद्रभक्तो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवं०
१९७

विशिष्यते॥रुद्रभक्तान्नहिपरोनहिकश्चिन्नविद्यते॥ अनभ्यर्च्यमहादे
वंमर्त्योपिप्रतिक्षणम्॥नान्नंफलंवागृहंतिनियतामितभाषिरागः॥
तस्यवशांगाविज्ञेयाशिवलिंगैकपूजकाः॥तदंगसंगतःसद्यःपाप
भंगःप्रजायते॥रत्नलिंगंश्रुतिप्रोक्तंरत्नंशांभवपुंगवः॥ अं तस्तदा
त्मकंलिंगंलिंगेत्तममितिस्मृतम्॥यस्यशांभवलिंगेषुनभक्ति
रूपजायते॥तेनस्थावरलिंगस्यपूजाकार्याप्रयत्नतः॥ अशांकरांगार
नारीनरनिरावलोकने॥निमील्यलोचनंपश्चात्कुर्यात्सूर्यावलोकनम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्यै द्वित

शिवनेत्रत्वबुधैर्वकर्त्तव्यंभानुदर्शनम्॥अन्यथाधीर्यद्वीत्तदापुनर्नर
कमश्नुते॥नाशांभवैःश्राव्यमेतद्भावैःश्राव्यमिदंमुने॥अशांभवेव
दन्नविप्राशिवद्रोहमवाप्नुयात्॥अशंभवैःसहप्रीतिंभोजनाद्यैःक
रोतियः॥सचांडालत्वमासाद्यविष्टायांजायतेकृमिः॥अशिवंयस्य
निटिलेतस्यैवाशिवदैवतम्॥शिवयस्यललाटेस्तितस्यस्याद्दैवतंशि
वः॥अशैवेषुमुकुंदोपिपक्षपातीभवेद्यदि॥मुकुंदमपिघोरेस्मिन्नर
केपातयाम्यहम्॥माहेश्वरेषुयदिकश्चनदुष्टबुद्ध्याद्रोहंकरिष्यति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
९८

कदाचनतत्कुलानाम्॥नाशोभविष्यतिनसंशयल्लेशवार्त्तोप्यत्रेतिशंकर
पदांबुजयोःशपामि॥यःशांभवःसतुपिताजननीसखाचभ्राताचबं
धुरपिमित्रमपीतिमन्ये॥धन्यःसएवममममान्यइतिस्मरामिगौरीस
हायचरणांबुजयोःशपामि॥इतिशैवंमहात्म्यसमाप्ताः॥नाममाहा
त्म्य केदारखंडे॥द्व्यक्षरंनामयेषांवैजिह्वाग्रेसंस्थितंसदा॥तेवैमनु
ष्यरूपेणरुद्रानास्त्यत्रसंशयः॥शिवेतिद्व्यक्षरंनामत्रायतेमहतोभ
यात्॥तस्माच्छिवंचिंतयतांस्मरतांचद्विजोत्तमाः॥किंतुवेवहुनोक्तेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवइत्यक्षरद्वयम्॥उच्चारयंतियेनित्यंतेरुद्रानात्रसंशयः॥शिवइ
त्यक्षरंनामव्याहरिष्यन्तियेजनाः॥किंतुवैवहुनोक्तेनशिवइत्यक्ष
रद्वयम्॥उच्चारयंतियेनित्यंतेरुद्रानात्रसंशयः॥शिवइत्यक्षरंना
मव्याहरिष्यंतियेजनाः॥तेषांस्वर्गश्चमोक्षश्चभविष्यतिनचा
न्यथा॥शिवइत्यक्षरंनाममहापापप्रणाशनम्॥येषांमुखोद्गतंनॄणां
तैरियंधार्यतेमही॥शिवेतिद्व्यक्षरंनामयैरुदीरितमुच्चकैः॥तेधन्या
स्तेमहात्मानःकृतकृत्यास्तएवच॥शिवसंहितायाम्॥उच्चरंतीये हि
उच्चारंति

शिव० मर्त्याः शिवनामामृतोपमम्॥ ज्ञानतोऽज्ञानतो वापि नास्ति तेषामघं
९९ ध्रुवम्॥ यश्चतुर्वेदविद्विप्रः शिवशब्दविव र्जितः॥ तेन संभाषणं नि
वा त्यं न कार्यं मोहतोपि॥ लैंगे॥ हत्वा भित्वा च भूतानि भुक्त्वा चान्या
यतोपि वा॥ शिवमेकं सकृत्स्मृत्वा सर्वपापैः प्रमुच्यते॥ वासिष्ठे॥ त्व
दनुस्मृतिकल्याणवतामिह महेश्वर॥ न च किंचन दुष्प्रापं न च का
श्चन भीतयः॥ त्वदनुस्मरणानंदपरिपूरितचेतसः॥ न ते संति ज
गत्कोशे प्रणमंति ये पुनः॥ ते देशास्ते जनपदास्ता दिशास्ते च पर्वताः॥

च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वदनुस्मरणोपात्तधियोयज्ञस्पिताजना॥फलंभूतस्यपुण्यस्यवर्त्त
मानस्यसेचनम्॥तनोतिचेष्ट्यतोवीजंत्वदनुस्मरणंविभो॥०
ज्ञानामृतैककलशः घ्नतज्योत्स्नानिशाकरः॥अपवर्गपुर
द्वारंत्वदनुस्मरणंविभो॥त्वदनुस्मरणंदारचिंतामणिम
तामया॥सर्वासामापदांमूर्द्धिल्पतंभूतपतेपदम्॥जाबा
लश्रुतिः॥अपिवायश्चण्डालःशिवइतिवाचंवदेत्तेनसह
संव सेत्तेनसहसंवदेत्तेनसहभुंजीत॥वासिष्ठलैंगे॥शिवेति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१००

वाचंयो नित्यं चंडालोपि जपेन्मुदा॥ सहते न वदेद्वाचं सहते न वसे
त्सदा॥ भागवते॥ यद्यक्षरं नाम गिरेरितं न्नरां सकृत्प्रसंगाद
घमाशु हंति तत्र॥ पवित्रकीर्तिं तमलंघ्यशासनं भवानहो द्वे
ष्टि शिवं शिवेतरः॥ शंकरसंहितायाम्॥ उच्चारयंति ये मर्त्याः
शिवनामामृतोपमम्॥ ज्ञानतोऽज्ञानतो वापि नास्ति तेषामघं
ध्रुवम्॥ लैंगे॥ यस्त्वतुर्वै रुद्रविद्विष्टः शिवनामविवर्जितः॥ ते
न संभाषणं नित्यं न कार्यं मोहतोपि वा॥ ब्रह्मोत्तरखंडे॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महापातकविच्छित्त्यै शिव इत्यक्षरद्वयम्॥ अलं नमस्क्रियायुक्तो मुक्तये कल्पितो मनुः॥ काशीखण्डे॥ कृत्वापि सुमहत्पापं त्वां यः स्मरति भावतः॥ आधारं जगतामीश तस्य पापं विलीयते॥ तव नामानुरक्ता वाक् पुंसो यस्य जगत्पते॥ अप्यद्रिकूटतुलितं नैनस्तमनुबाधते॥ रजसा तमसा विवर्द्धितं क्व नु पापं परितापदायकम्॥ क्व च तेशिवनाम मंगलं जनजीवातु जगद्दुरापहम्॥ यदि जातु चिदंधकद्विषस्तव नामोष्ठपुटाद्विनिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्या न स्याच्चैकयाल्येंद्रलक्ष्मी॥ यस्यास्तु स्यालभ्य तैस्सह स्नौकोप्यस्या चर्तोमोक्षलक्ष्मीरहस्या॥

स्तत्म्॥ शिवशंकरचंद्रसेखरेत्यं सकृत्तस्य न संसृतिः पुनः॥ तत्रैव
व्यासः यस्यैकाख्या वाजिमेधेन तुल्या॥ ब्रह्मवैवर्ते॥ ब्रह्महा वा
सुरापी वा स्तेयी वा गुरुतल्पगः॥ ध्रुवं ते काले शिवं स्मृत्वा शिवसा
युज्यमाप्नुयात्॥ येनैवोदीर्यते शुद्धः शिवः शब्दोमृतं निरंगे॥
तेनैव प्राप्यते मोक्षः स यतो मोक्षदायकः॥ शिवशब्दमनुच्चार्य
ब्रह्मरागोपि न मुच्यते॥ शिवशब्दं समुच्चार्य चंडालोपि विमु
च्यते॥ सर्वाणि शिवनामानि मोक्षदान्येव सर्वथा॥ तत्रैवव्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्युतमंनामशिवेतिब्रह्मसंज्ञितम्॥ अघोरतरसंसारसागराप्लुतमप्लव
म्॥ उद्धरत्यंतकालेऽऽज्ञंशिवनामशिवात्मकम्॥ शिवनामसमं
वस्तुनदृष्टंक्कापिनश्रुतम्॥ रत्नरत्नमिदंभूतंनामरत्नमनुत्तम
मम्॥ नित्यंकण्ठधृतोऽनशिवनाममहामणिः॥ स नील
कण्ठभूत्वांतेनीलकण्ठविलीयते॥ ब्रह्मप्रकाशकसाक्षा
च्छिवइत्यक्षरद्वयम्॥ नतस्मादधिकांक्कापिनामब्रह्मप्रका
शकम्॥ प्रतिक्षणंशिवेत्येवनामयोवक्तुमिच्छति॥ तस्मैन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० मोनमो भूयो नमस्तस्मै नमो नमः ॥ यस्य रोगेति शिवेत्येतन्नाम भ
१०२ क्तिपुरःसरम् ॥ तस्मै० ॥ शिवेति नाम श्रुत्वैव यो लब्ध हृदयो भवेत्
॥ तस्मै० ॥ शिवेति नाम पीयूषं यः पिबेदन्वहं मुदा ॥० तस्मै० ॥
शिवनाम्नैव सततं व्यवहारं करोति यः ॥ तस्मै० ॥ महाप्रलयका
लाग्निर्यथा दहति पर्वतान् ॥ तथा दहति पापाद्रीन् शिवनामा
वलो ध्रुवम् ॥ शिव इवनाम निरंजनं निराकारं परं ब्रह्म नैव त
स्मात् दुर्लभमिद्यते ॥ नमः शिवायेति सकृज्जापित्वा पापं महद्धो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रमुपैतिनाशम्॥भूम्यंतरिक्षात्परिपूर्णाकाष्ठंस्वल्पाग्निनादग्ध
मुपैतिनाशम्॥अन्यानिशिवकर्माणिकरोतुनकरोतुवा॥शि
वनामजपेद्यस्तुसर्वदामुच्यतेतुसः॥नामानिचमहेशस्य
श्चरांत्यज्ञानतोपिवा॥तेषामपिशिवोमुक्तिंददातिकिमतः
परम्॥हत्वाछित्वाचभूतानिभुक्त्वात्वन्यानतोपिवा॥शिवमे
कंसकृत्स्मृत्वासर्वपापैःप्रमुच्यते॥सर्वाणिशिवनामानि
मोक्षदान्येवसर्वदा॥तेष्वप्युत्युत्तमंनामशिवेतिब्रह्मसंज्ञितं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मः॥सादरंभस्मदिग्धांगोवदेच्छिवशिवेतियः॥ससंसारविनिर्मुक्तो
भवत्येवनसंशयः॥अनेकजन्मभिर्नित्यंपुण्यंबहुकृतंयदि॥त
दाशिवेतिशब्दोयंसादरंनिःसरिष्यति॥अव्यक्तंपरमंब्रह्मशि
वइत्यक्षरद्वयम्॥तदेवंसर्ववेदांतप्रतिपाद्यंनसंशयः॥तद्धि
ब्रह्मेत्युपासीतभवतिब्रह्मवांस्ततः॥ब्रह्मवान्ब्रह्मविद्भूत्वाब्र
ह्मभूतोहिजायते॥शिवेतिनामविमलंयेनोच्चरितमादरा
त्॥तेनभूयोनसंसारसागरःसमवाप्यते॥परमंखलुपूर्णं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूषणंशिवनामस्मरणंमनोहरम्॥तदपारसुखावहंसदानन्द

तंयेनसयातियातनाम्॥आकर्णंसलिलेनिमज्ज्यपुलिना

भोगेयथानेशिरः॥कृत्वाशैलसुतापतेपुररिपोगंगाधरे

त्यालपन्॥गृह्णन्करणपुटेशिवेनकृपयाप्रख्यातहंतंतार

कंतीरजाह्नवितावकेतवुपरित्यागंविधास्येकदा॥रुद्राक्षस्य

चघोररणेसितेतरेश्चोतोग्निजेभस्मनिश्रद्धारु॥प्रसंगात्कौतु

काल्लोभाद्भयादज्ञानतोपिवा॥हरइत्युच्चरन्मर्त्यसर्वपापैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰ प्रमुच्यते॥शिवेतिवाचंयोनित्यंचराडालोपिवदिष्यति॥सहतेनवदेद्वा
१०४ चंसहतेनवसेत्सदा॥परंब्रह्मेतिविज्ञेयंशिवइत्यक्षरद्वयम्॥
परब्रह्मविदिर्नवतदुपास्यंमुमुक्षुभिः॥हृदयकमलमध्येश
ब्दजालैकसारो निवसतिभुवियेषांश्रीमहादेवशब्दः॥क्षण
मपिसकलार्थज्ञानमोक्षप्रदाता भवतिहिभुवितेषांसत्यमेवा
नवाद्यं॥शब्दाःसंतिसहस्रफल्गुफलदामंत्राःपराःकोटयो
नाम्नैकंत्रिपुरांतकस्यमननादिष्टार्थसिध्येसकृत्॥नाम्नैकंप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वरंवदत्यतितरांतेभ्योनवद्येहरे॥ विष्णोर्नामसहस्रतःशिवपरावा
सीचतासांवरम्॥ ३॥ यस्यास्येशिवनामकेवलमिदंप्रातस्तरांगी
यतेतेनाहोस्विदपर्ववेदसहितावेदाऽप्यधीतास्तदा॥ पापान्याशु
लयंप्रयांतितपनप्राच्योदयाद्वोयथासद्यस्त्वघतमांसितच्छि घं
वशिवेत्युच्चैस्तरांकीर्तयेत्॥ भीतंयस्यमनोविचिंत्यविविधं
संसारदुःखंसदाजन्मव्याधिमृदंतरायबहुलंसःश्रेयसेसांप्र
तम्॥ श्रीमंड्याघ्रपुरेचत्र्यंवकगिरौपुर्यांयविमुक्तोनघेकेदन्नाम
म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० दिवानिशंस्मररिपोःसंत्यक्तसंगःसुधीः॥नामोच्चैःप्रवरंशिवस्वक
१०५ ल्पितसंसिद्धयेसर्वदायच्छ्रोतश्चवरंप्रविश्यसहसासंसारबंधं
हरेत्त॥उत्सृज्यापितपोव्रतंहृदिशिवंध्यायन्सदाकीर्तयेद्दि
श्वेशेत्रिपुरांतकेश्वरशिवेत्याध्यायमूर्ध्वांजलिम्॥योनामेश्व
रमीरयेद्धरशिवश्रीनीलकंठेश्वरप्रद्युम्नप्रमथेत्रिनेत्रमखभि
त्सर्वेशरुद्रेतिच॥तंवत्संप्रियगौरिवैतिहिशिवोहुंकृत्यतस्याशुभं
सर्वाभीष्टफलंप्रकटयन्होहानवद्येशिवः॥शिवेतियद्वाचिविहिवर्णा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

युग्मं प्रवर्त्ततेनश्यतितस्यपापम् स्वर्गस्वलाभःसुलभोन्यधर्माः
प्रत्यहवंर्ततःकलिदोषदुष्टाः॥शिवशिवशिवेतिव्याहरन्युस्त्रिवारं
त्यजतिनिजतनुंस्वायुषोंन्यक्षरोगसौ॥भवतिहिभवस्यछेदकः
पूर्वशाब्दोनभवतइतरौतौकल्पितान्योपकारौ॥उच्चैरुच्चरिंते
महेश्वरमहादेवादिभिर्नामभिः॥पाषारोभ्टशताडितानिस
हसापापोच्चतालाग्नतः॥सद्यःपातकानांपतंतिहिफलान्याभ
ज्यमानान्यघौ॥यावच्चूर्णितपापतालतरवोनश्ययुरित्यद्भूत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ॥ मत्वैवंसमालोक्यशिवोवभाषेमन्नामयेषांमरणेसमास्ते ॥ मच्चेत
१०६ सामन्यधियाचनामहीनाक्षरंवाधिकवर्णयुक्तम् ॥ ममैवलो
कंप्रददामिसत्यंह्यनेननामप्रहरेतिचोक्तम् ॥ प्रशब्दमात्रेत्व
धिकंहरेतिगतिप्रदंयेपदमीरयंति ॥ येस्मरंतिमहादेवंयदि
पापरताऽपि ॥ तेविशेषामहात्मानः इतिसत्यंब्रवीम्यहम्
॥ कोट्योब्रह्महत्यानामगम्यागमकोटयः ॥ सद्यःप्रलयमा
यांतिमहादेवेतिकीर्त्तनात् ॥ महादेवस्यकल्याणिवाणीय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यमुखांवुजे॥ सधन्यः पावयत्यन्यान्स्वदृष्टिपथगोचरान्॥ पा
हिपाहिमहादेवभक्तवर्गैकजिवन॥ भयंदूरिकुरुष्वाद्यकिंमे
तदनुवर्त्तते॥ महादेवंस्मरंतंमामयंचेदनुधावति॥ तदासंसा
रभीर्भेककथंदूरीभविष्यति॥ महादेवस्मृतिर्यस्यतस्यना
स्तिभयंध्रुवम्॥ इतिवेदावदंत्येवंततोनान्यत्तवादिनः॥ मह
देवेतिनामेदंयःस्मरंगोनिवदिष्यति॥ नतस्यनरकेवासः स
त्यंसत्यंनसंशयः॥ महादेवमहादेवंमहादेवेत्ययंध्वनिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० १०८

संसारसर्पदष्टानां दिव्यौषधमनुत्तमम्॥ शिवेति नाम विमलं शिव
नामोत्तमोत्तमम्॥ तद्येन स्मर्यते नित्यं तस्य दासो भवाम्यहम्॥
त्रिपुरोद्धारणं कृत्वा महादेवमनुस्मरन्॥ यो याति यत्र तत्रैव
महादेवोधितिष्ठति॥ महादेव महादेव महादेवेत्ययं ध्वनिः
॥ सुधियो मुक्तिकांताया पाणिग्रहणडिंडिमः॥ महादेव
महादेव महादेवेत्ययं ध्वनिः॥ ज्वरवन्मृत्युहरो नूनं कालं
मृत्योश्च नाशकः॥ महादेव०॥ संसारवृक्षदावाग्निः सत्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सत्यंनसंशयः॥महादेवेतिवाग्वल्लिचतुरक्षरपल्लवा॥भ
क्तिसिक्ताभवत्येवचतुर्वर्गफलप्रदा॥महादेवेतिविमलो
नामकल्पतरूर्विधः॥यंयंकामयतेकामंतंतंकामंददा
तिसः॥महादेवमहादेवेत्यररायेसंचरंजनः॥वशीकरोति
व्याघ्रादिनपिसत्यंमयोच्यते॥महादेवमहादेवेत्युच्चरन्न
नियतेंद्रियः॥मत्युंनगरायत्येवसत्यमेवोच्यतेमया॥
कोटयोब्रह्महत्यानामगम्यागमकोटयः॥सद्यःप्रलयमायां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ॥ त्तिमहादेवेतिकीर्तनात् ॥ महादेवकथालापेसुधावुद्धिर्भवेद्यदि ॥
१०८ तदाभवतिसंसारशोकराशिविनाशनम् ॥ शिवनामामृतंपीतं
मुदायेनमुहुर्मुहुः ॥ नपिबन्त्येवसपुनर्मातुस्तन्यंपुनःपुनः
॥ लिंगमहात्म्यदिपीकायाम् ॥ शिवलिंगसहस्राणांपूज
यायन्फलंलभेत् ॥ ततःशतगुणंपुण्यंलिंगेनादिसमु
द्भवे ॥ तेभ्यःशतगुणंप्रोक्तंरत्नलिंगस्यपूजने ॥ गोमेदका
निलिंगानिरत्नलिंगानिसुव्रताः ॥ रत्नलिंगसहस्राणांपू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जयायत्फलंलभेत्॥ततःशतगुणंपुण्यंधातुलिंगस्यपू
जने॥धातुलिंगेष्वपिश्रेष्ठंहेमलिंगमितिश्रुतम्॥तत्रसं
पूजितःशंभुःप्रसीदतिनसंशयः॥धातुलिंगसहस्राणांपू
जयायत्फलंलभेत्॥ततःशतगुणंपुण्यंमृत्तिकालिंग
पूजने॥मृल्लिंगानांसहस्रस्यपूजयायत्फलंभवेत्॥ततः
शतगुणंप्रोक्तंबाणलिंगस्यपूजने॥अनंतबाणलिं
गानांपूजायायत्फलंभवेत्॥ततोनंतगुणंपुण्यंरसलिंग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१०८

स्यपूजने॥ रसलिंगसमंलिंगंनास्तिनश्रूयतेपिच॥ रसलिंगं
शिवसाक्षात्सच्चिदानंदलक्षणः॥ यंयंकामयतेकामंरसलिंग
स्यपूजया॥ तंतमाप्नोतिविप्रेंद्राः सत्यंसत्यंनसंशयः॥ सार
संग्रहेतुशिवनाभिश्चेष्ठतोक्ता॥ यथा॥ शिवनाभिमयं
लिंगंनित्यंपूज्यंमनीषिभिः॥ यच्छ्रेष्ठंसर्वलिंगेभ्योगौ
रिसंगान्नसंशयः॥ अथसकामानांयुगविशेषेलिंगवि
शेषकथनपूर्वकंपार्थिवलिंगविधानंसारसंग्रहे॥ कृते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रत्नमयंलिंगंत्रेतायां हेमसंभवम्॥द्वापरेपारदंश्रेष्ठंपार्थि
वंतुकलौयुगे॥लिंगपरीक्षा॥बाणलिंगपरीक्षापूर्वकंतन्म
हिमाशिवरहस्ये॥विपंचसप्तधायस्तुतुलातुलितमादरात्॥न
यातिसमतांतत्तुबाणलिंगमितिश्रुतम्॥सपीठमंस्त्वपीठं
वाबाणलिंगंशिवात्मकम्॥पूजनीयंप्रयत्नेनभुक्तिमु
क्तिफलेप्सुभिः॥नप्रतिष्ठाद्यपेक्षापिबाणलिंगस्यवस्तु
तः॥यतःकुतश्चिदानीयबाणलिंगंप्रपूजयेत्॥नर्मदेनामे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ११० देलिंगेनिवसाम्यहमन्वहम्॥संदेहंमाकुरुष्वेतिप्राहशंभुर्यतः
पुरा॥तत्रैववरसल्लिंगवंधनपरीक्षा॥निष्कत्रयंहेमपत्रंरसे
न्द्रंनवनिष्ककम्॥धूम्रेलनमर्द्दयेद्यामंतेनलिंगंतुकारये
त्॥दोलायंत्रेसारनालेजंवीरस्यदिनंपचेत्॥तथाचशिव
नाभिलक्षणंशिवरहस्ये॥उन्मत्तमहियाख्याशिलाः
संतिशिवात्मिकाः॥तासुयत्नेनलब्ध्याःसाक्षान्मोक्षप्र
दायकाः॥कपिलंतच्छिलामूलंपार्श्वेस्यामेवसाशिलाः॥उप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्धुन्नतमहिषनेत्रसंनिभमुत्कटम्॥ अथपंचसूत्रनिर्णयः॥०
लिंगहृत्तसमंमध्यंउर्ध्वेविस्तीर्णमेवच॥ तदर्धंगोमुखंप्राहुः
पंचसूत्रमिदंमतम्॥ गौतमीतंत्रे॥ लिंगमस्तकविस्तारोलिं
गेछायसमोमतः॥ परिधिस्त्रिगुणितस्तद्वत्पीठंव्यवस्थि
तम्॥ प्रणालिकातथैवस्यात्पंचसूत्रविनिर्णयः॥ लिंग
मस्तकविस्तारंपूजाभागसमंभवेत्॥ नाहंतत्रिगुणंकुर्या
न्नाहवत्पीठविस्तृतम्॥ पूजांशाद्द्विगुणंकुर्यात्उन्नतंपीठमु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० त्तमम्॥ वृत्तं वा चतुरस्रं वा मध्ये कंठसमन्वितम्॥ द्विगुणां लिंगनाहा
१११ च्च कंठनाहं समाचरेत्॥ त्रिमेखलमधश्चोर्द्ध्वं समं वा यदि मेख
लम्॥ लिंगमस्तकविस्तारं षड्भागं विभजेत्ततः॥ मेखलामे
कभागेन कुर्यात्खातं च तत्समम्॥ लिंगदैर्घ्यसमं कुर्यात्
प्रणालं पीठबाह्यतः॥ विस्तारं तत्समं मूले तदर्धं च तदग्र
तः॥ जलमार्गप्रकर्तव्यः तस्य मध्ये त्रिभागतः॥ कुर्यात्पी
ठार्धदीर्घं वा प्रणालं च तत्वोदितम्॥ सर्वेषां तत्र लिंगानां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सपीठानां विशेषतः॥ लोहादीनां च लिंगानामेवं लक्षणमा
चरेत्॥ लिंगनाहसमं पीठविस्तृतं विस्तृजस्य शरवेद
तुंगकम्॥ तुंगकार्धसमं गोमुखांतकं गोमुखांतसमकंठ
नाहकम्॥ अथ लिंगपूजात्यागे प्रत्यवाय लिख्यते॥ शि
वरहस्ये॥ भानुरुवाच॥ त्यक्त्वा महादेवपदांबुजार्चां कोवा
सुखं प्राप्नुमिह प्रवृत्तः॥ संजीविनी चेन्मरणोन्मुखेन त्य
क्त्वा कथं वा वद जीवनं स्यात्॥ वरं मरणमन्वहं वरमघौघको

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
११२

स्याज्जनंवरंचविषभोजनंवरमपास्योहिंसनम्॥वरंद्विजव
धोपिवानवरमीशलिंगार्चनव्यपायइतिमेमतिःकिमिति
तस्यवाजीवनम्॥नमातृगमनेनवाभवतितादृशंपातकं
सुरादिमधुसेवनादपितथाविधंपातकम्॥द्विजोत्तमव
धेनवानचतथाविधंपातकंनयादृशमुमापतिप्रियस
मर्चनत्यागतः॥अनायासेनसिध्यंतिसर्वेधर्माःशिवा
र्चनात्॥तत्परित्यागतःपापान्यनायासार्जितान्यपि॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शं

अहोशिवार्चनत्यागं पुराण्याद्रिकुलिङ्गिनीं विदुः॥ पुराणारण्यं
दृष्ट्वं प्राहुर्वेदवेदांतपारगाः॥ नवनीतगिरिर्यथानलात्स्खल
यंयातितथैवसर्वथा॥ सुकृताद्रिलयोपिजायतेशिवपूजावि
रहेविशेषतः॥ शिवान्यःकश्चिदाराध्यस्तिष्ठतीत्यपियोवदेत॥
सवेदवाह्यश्चांडालोजारजश्चेतिमन्यताम्॥ शिवरहस्ये॥ प
राशरपुराणे॥ विहायसांवमीशानंपतंतेयेविमुक्तये॥ ते
महातमसाक्रांतानतेषांपरमागतिः॥ विहायसाम्बमीशा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ते

शिव० नंयजंतेदेवतांपरम्॥तेमहाघोरसंसारेपतंतिपरिमोहिताः॥महा
११३ देवस्यसांबस्यशेषत्वेनैवकेवलम्॥देवताःसकलाध्येयाःसु
विज्ञेयामनीषिभिः॥सर्वमन्यत्परित्यज्यशिवस्वशिवंक
रः॥ध्येयइत्याहपरमाश्रुतिराथर्वणीखलु॥अथकिंबहु
नोक्तेनशिवस्सांबस्सनातनः॥साक्षान्निष्ठाहिशास्त्राणांना
परःसत्यमीरितम्॥अन्येनालघुजातीनामाश्रमाणांतथै
वच॥प्राधान्येनमहादेवःपूज्योनान्योस्तिसिद्धये॥तत्राप्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्थंमहाविष्णुःसर्वैःपूज्यःसनातनः॥पितामहोपिसर्वात्मातदर्थंपू
ज्यएवहि॥देवतानुत्तमाःसर्वामध्यमाऽप्यधमापिवा॥तदर्थं
पूजनायाश्चसर्वजात्याश्रमैरपि॥शिवंवेदांतममत्वायजाद्य
प्रभृतिर्द्विज॥शिवान्यसुरतुल्यत्वंशिवेस्वप्नेपिमावद॥शिवा
न्यसुरतुल्यत्वंयेवदंतिसदाशिवे॥तेषांवंशक्षयशिघ्रंभवि
ष्यतिनसंशयः॥शिवा०॥तेपतिष्यन्तिनरकेयावदाचंद्र
तारकम्॥शिवा०॥नतैःसहश्रमेरगापिकुर्यात्संभाषणं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० द्विज॥ अन्यामरसमं मत्वा यैतिष्ठन्ति महेश्वरम्॥ आशैवास्तइ
१२४ ति ज्ञेया स्ते घोर नरकास्रयाः॥ इति शिवरहस्ये॥ शिवनिंदा प्रत्यवा
यो लिख्यते॥ शिवरहस्ये॥ शिवनिंदा श्रुता येन कारिता वा भवि
ष्यति॥ तेनापि यत्नतः कार्यं प्रायश्चित्तं यथाक्रमात्॥ अथ प्राय
श्चित्तविधिर्लिख्यते॥ उपवासेन विधिवद्धोमं मुंडनपूर्वकम्
॥ पंचगव्यं प्रयत्नेन माहेशंकरनिंदितः॥ ततः काशीमाहात्म्यमु
त्तमम्॥ सहस्रवारं यत्नेन पठनीयं समाहिते॥ ततः श्लोकमं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रैस्तुतिलहोमोयथाक्रमम्॥कर्त्तव्योलक्षपर्य्यंतंतिलाज्यादिभि
रुतमैः॥तद्दृष्ट्वाविशाद्दाहत्याशैवाशिवपरायणा॥भोजनीया
प्रयत्नेनदेयाचस्वर्णदक्षिणा॥शिवद्रोहप्रत्यवायोलिख्यते॥
पितापितामहोवोस्तुब्राह्मणःक्षत्रियोपिवा॥शिवद्रोहीयदिभ
वेत्सहंतव्यइतिश्रुतिः॥शिवद्रोहिणमायांतंयादृशंतादृशंद्वि
ज॥हत्वामोक्षमवाप्नोति।स्मिश्रुतिरनेकधा॥प्रवलश्चेत्तशिव
द्रोहीयदिहंतुंनशक्यते॥तदादेशांतरेगच्छदतियत्नेनसादर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० म्॥ शिवरहस्ये॥ व्रतनिर्णये॥ दशशैवव्रतान्याहुर्जाबालश्रुतिपार
११५ गाः॥ प्रत्यष्टम्यां प्रयत्नेन कर्त्तव्यं नक्तभोजनम्॥ कालाष्टम्यां
तु तत्त्याज्यं भोजनं यत्नपूर्वकम्॥ अवश्यं सितभूतायां कर्त्तव्यं
निशि भोजनम्॥ असितायां तु भूतायां तन्न कार्यं द्विजाति
भिः॥ एकादश्यां सितायां तु त्याज्यं भोजनमास्तिकैः॥ असि
तायां तु भोक्तव्यं नक्तमभ्युर्दशंकरम्॥ त्रयोदशां तु भोक्त
व्यं रात्रावेव प्रयत्नतः॥ शिवलिंगार्च्चनं कृत्वा स्वशक्त्या यत्न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्वकम्॥निशियत्नेनकर्तव्यंभोजनंसोमवासरे॥उपोषणादिना
न्यस्मिन्न दिवसेनियमोत्ययम्॥पर्वण्यपिदिनेत्याज्यंभोजनं
सोमवासरे॥किमुतान्येषुदिवसेष्वितिजावालवादिनः॥ससो
मसितभूतायासाद्रापातसमन्विता॥तस्यामुपोषणंकार्यंनिशि
जागरणंतथा॥भोजनीयःप्रयत्नेनशैवशक्तिपुरःसरम्॥वक्ष्ये
शांभवदीक्षायाःश्रुणुलक्षणमन्वहम्॥आपादमस्तकंसर्वं त्रिपुंड्रं पि
भस्मधारणम्॥रुद्राक्षधारणंस्वशक्त्याशिवलिंगपूज्या शैवषड

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
११६

क्षरमनुजपारुद्राध्यायजपः॥पूर्वोक्तदशशैवव्रतानि एतावंतःशै
वधर्माःशैवदीक्षेतिगीयते॥इतिश्रीशिवरहस्येजाबालोपनिषत्प्रमा
णकम् सोमवारव्रतंकार्यंप्रयत्नेनयथाविधि॥शक्तेनोपोषणं
कार्यमन्यथानिशिभोजनम्॥कार्त्तिकमासगतसोमवासरचतुष्टये
उपोष्यनक्तंयामचतुष्टयेशिवपूजाकार्यामहाशिवरात्रिवदितिका
शीप्रापकंव्रतमुक्तं शिवरहस्येसप्तमांशे॥नक्तंव्रतंप्रयत्नेनक्रियते
येनसर्वदा॥तेनव्रतानिसर्वाणिचीर्णान्येववरानने॥सनिराशीति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विज्ञेयो योनक्त्वाशी सदा भवेत्॥ सर्वेषां तपसां श्रेष्ठं यतो नक्ताशनं शिवे॥ नक्ताशा नरता धीरा भस्मनिष्ठा जितेंद्रिया॥ गर्भवासादि दुःखेभ्यो निवर्त्तंते न संशयः॥ परार्थे रुद्राध्याय जपाजन्मत्यवाय लिख्यते॥ शिवरहस्ये॥ शरीरमपि देयं स्यात्कदाचिद्धनलोभतः॥ फलं न देयमन्यस्मै रुद्राध्याय जपार्जितम्॥ श्रीरुद्रजपमन्यार्थे यः करोधनेछया॥ सपतत्येव नरके यावदाचंद्रतारकम्॥ रुद्राध्याय जपं पुण्यं परार्थे यः करिष्यति॥ सपिशाच्चो भव

ति

शिव० त्येवनास्तितस्यापनिस्कृतिः॥काश्यांरुद्रजपंकृत्वापरार्धंयस्तुजीव
११८ ति॥धिग्धिग्धिक्तस्यधिग्जन्मधिग्धिग्धिक्तस्यजीवनम्॥शिव
पूजनेऽप्यविश्वासप्रत्यवायोलिख्यते सत्यव्रतमुनि०॥विश्वासःखलुध
र्मेषुसर्वदासुखदायकः॥अविश्वासेनदुःखानिभवन्त्येवपदेपदे॥१॥
अतस्तावदविश्वासोपरित्याज्योतिदूरतः॥तत्रशंभवधर्मेषुविश्वा
सश्चेद्विशेषतः॥२॥तदातरंतिसंसारंशोकसागरमादरात्॥अविश्वा
सोयदिभवेत्शिवमधर्मेकदाचन॥तदातद्वंशनाशःस्यात्सएवाशनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुन्पितः॥ भक्त्याक्षरां क्षरागर्द्धवा विश्वासेन सदाशिवम्॥ यः पूजय
तितं तावद्दह्यमित्याहुरास्तिकाः॥ शिवरहस्ये॥ श्रीमहाशिवरात्री
महात्म्यम् शिवरहस्ये॥ किंतैर्वाग्रहरागार्बुदैरर्पितयाकिंतैरपा
रायरौरेतत्कालसमानकालइतिमेधीरागमैर्जायते॥ तस्मा
र्द्वयशंकरंवहुविधैर्द्रव्यैरपारैरयंकालोदुर्लभएवतावदधु
नाकायोप्यवंदुर्लभः॥ भूतापावदुपैतितावदभयंपापांवुराशे
र्भवेतुत्साचेदंतिकमेतिकंपमतुलंप्राप्नोतिपापार्णवः॥ किंकर्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० व्यमतःपरंननिलयःकोपीवेगाग्रंयात्तेवाशिवपूजकंशिवरतेजा
११८ तेस्वचित्तेसति॥भूतायांनिशिपल्लवमुमाकांतायलिंगेमुदादा
तुंवांछंतियःसएवसुकृतीबोधिःसःपुण्याकृतिः॥तंदेवाःप्र
णामंतिभूमिविलसद्भालंमुहुःशंभवंरुद्राक्षाहतकंठकर्णावि
वरंतंकिंनरंवानरम्॥१॥श्रीकपालेश्वरमाहात्म्यंलिख्यते॥०
शिवरहस्ये॥आजन्मयस्तिष्ठतिकाशिकायांतपांसिकुर्वन्नपव
नाशनसन्न॥सयत्फलंप्राप्नुतितत्सहस्रधास्थित्वाकपालेश्वर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सन्निधौ स्मराम ॥ मिक्षोतरकर राजराजकरग्रणां भोधेकपालेश्व
रनीतंचेन्ममानसंतवविभोलिंगार्चनेशंकर ॥ शंभोतातन
यैवनयभोकिंत्विशमापुनर्देहितेवममेप्सितंकुरुविभोशं
भोनमस्तेसदा ॥ कपालमालीचपिनाकहस्तस्त्रिशूलखट्वांग
धरोमहेशः ॥ उमापतिःपंचवटीनिवासीगंगाधरोपापहरोविं
धाता ॥ स्मरस्यहर्तात्रिदिवस्यकर्त्तासनातनस्त्वंपुरुषोमतोसि
त्वांयेभजंतःपुरुषंपुराणंतेमुक्तिमार्गस्यसतांप्रदर्शकाः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० ग्यामारांगादशकं दत्तंसम्रद्धिम्वातिवीर्यवान्॥इत्थंकपालेश्वर
११८ पादपंकजद्वयस्यभक्तेर्महिमामयोदितः॥पद्मपुराणे नाशी
कमहात्म्ये॥श्रीरुद्राध्यायमहात्म्यंलिख्यते॥शिवरहस्ये७४
मांशे॥रुद्राध्यायार्थविज्ञानीपदार्थज्ञानवान्नरः॥नमोंतेन
शिवंध्यायन्सर्वपापैःप्रमुच्यते॥नमोंतेनचतद्रूपंपशूनांपरं
मेश्वरम्॥सर्वेषामप्युमाकांतंनितांतंशांतमव्ययम्॥रुद्रमध्य
गतैर्नमोन्तैरूभयोरपि॥एकद्वित्रोनमस्कारैःध्यायेद्देवंपिना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किनमः॥सर्वदेवाधिदेवेशं विश्वेशं रुद्रसूक्ततः॥ध्यायन्मंत्रान्
जपेद्रुद्रान्नतदर्थावबोधतः॥स्तेयं कृत्वाब्रह्महत्यां चकृत्वाम
द्यंपीत्वागुरुदारांश्चगत्वा॥भस्मछन्नोभस्मशय्यासनस्थोरुद्रा
ध्यायीमुच्यतेसर्वपापैः॥एकादशानुवारंचरुद्रमंत्रान्जपेद्द्वि
जः॥शंचमेत्यादिचजपन्क्रमादेकादशाहुतमः॥जपाल्लिंगेभिषे
कोवैशंभोःप्रियतमोमतः॥जपाद्दशगुणःप्रोक्तोह्यभिषेको
महेश्वरे॥वस्त्रपूतेनतोयेनह्यविच्छिन्नांप्रकल्पयेत्॥धारामिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० क्षीराभिषेकं लिंगे रुद्रमंत्रैः समाचरेत्॥ न भूयः स्तन्यपो मातु
१२० र्भविष्यति न संशयः॥ यो रुद्रैर्वा नमस्कारं प्रदक्षिणमथापि
वा॥ कुर्याच्छिवालये शंभोः सन्निधौ स तु मुक्तिभाक्॥ रुद्रमं
त्रैस्त्रिकालं यस्तु नन्नर्तेन समाचरेत्॥ स शंभोर्गणपो भूयाद्गुरुत्त
रेण न संशयः॥ यो बिल्वमूले रुद्रांश्च जपेत् ध्यायन्महेश्वरं॥ स
कोटिरुद्रसाम्यस्य फलं लब्ध्वा विमुच्यते॥ यत्र स्थितो रुद्रजापी
तत्र शम्भुः स्थितः सदा॥ तस्मै वित्तं शंभवायदत्तं तच्छंभवे स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दा॥ रुद्राध्यायजपानुरक्तहृदयो रुद्राक्षभस्मादरो जप्त्वावाप्यभिविं
च्यवाशशिमहाचूडोरुलिंगंसदा॥ मूढोवाप्ययपंडितोयतिवरो
भूयाच्छिवाग्रेसरो विष्णुब्रह्ममरुद्गणार्चितपदोनंदीशतुल्यो
गणाः॥ नर्मदामहात्म्यलिख्यते॥ अथातिपुण्यवतामेवरेवातीरस
मागमः॥ तत्रापिशिवभक्तियोगःपुण्यगिरिकोटिभिः॥ पुरौय
रपारैरखलुशंभवत्वं तत्रापिरेवातटसंश्रितत्वंमः॥ तत्रापितल्लिंग
समर्चकत्वं तत्रापितदेहविसर्जकत्वंमः॥ राजस्युवाच॥ कदारेवा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तीरेरुहनिकरवालानिह चिरंचिरंतुंगंलिंगंनवरुचिरदूर्वाकुरजलैःसमा
राध्यंध्यात्वाशिवभसितपूताशिवशिवमहेशेतिनित्यसेतनुरितिप्री
तिरनिशम्॥ब्रह्मोवाच॥रेवातीरंप्रार्थयन्त्येवगंगातीरोत्पन्नोमु
क्तिकामःप्रकामम्॥रेवातीरेयत्तपस्तत्तपःस्यात्॥मुक्तैरेवा
लिंगरूपाविपापा॥पापानिसंहरतिनिर्मलनर्मदांमः॥सं
सेवितंसकृदपारसुखंतनोति॥तत्श्रीमहेशनिहितंवितनोतिमुक्तिं
रेवाजलेनसदृशंकिमिहात्रिलोके॥श्रीज्योतिर्लिंगमहात्म्य०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिंगानिज्योतिषांचैवविद्यंतेऋषिसत्तमाः॥तान्यहंकथयाम्यद्यश्रु
त्वापापंव्यपोहति॥सौराष्ट्रेसोमनाथंचश्रीशैलेमल्लिकार्जुनम्॥
उज्जयिन्यांमहाकालमोंकारममरेश्वरम्॥केदारंहिमवत्पृष्ठे
डाकिन्यांभीमशंकरम्॥वाराणस्यांचविश्वेशंत्र्यम्बकंगौतमे
तटे॥वैद्यनाथंचिताभूमौनागेशंदारुकावने॥सेतुबंधेतुरामे
शंघुश्मेशंचशिवालये॥द्वादशैतानिनामानिप्रातरुत्थाययः
पठेत्॥सर्वपापविनिर्मुक्तःसर्वसिद्धिफलंलभेत्॥यंयंकाम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० मपेस्यैवपरिध्यंतिनरोत्तमाः॥तस्यतस्यफलावाप्तिर्भविष्यतिनसं
१२२ शयः॥एतेषांपूजनेनैववर्णानांवरांगस्य्रतम्॥नैवेद्यंचैवसंग्रा
ह्यंभोजनीयंप्रयत्नतः॥भुक्तेसर्वाणिपापानिभस्मसाद्यातितत्
क्षणात्॥एकंचपूजितंयेनवरामासंचनिरंतरम्॥तस्यदुःखंनजा
येतमातृगर्भसमुद्भवम्॥शिवरहस्ये॥भक्तिमाहात्म्यंलिख्यते॥
येषांचेतस्तपःपूतंतेषामेवमहात्मनाम्॥जायतेगिरिजानाथे
भक्तिरव्यभिचारिणी॥अनंतजन्मभिर्येनतपस्तप्तंभविष्य

ति॥तस्यैवभक्तिर्भवतिभवानीप्राणवल्लभे॥जातापिशंकरेभ

धा क्तिरन्यसाँस्रगीहण्या॥परंत्वव्यभिचारेणशिवभक्तिरपेक्षिता॥

यस्यास्त्यामरणंशंभौभक्तिरव्यभिचारणी॥तस्यैवमोक्षःसु

लभोनान्यस्येतिमतिर्मम॥विघ्नेवंतिप्रत्यूहाःशिवभक्तिवि

घातकाः॥प्रत्यूहाःक्लेशमंयांतिमहेशानुग्रहात्पराः॥भ

क्तिचिह्नानिलिख्यंते॥शंकरसंहितायाम्॥प्रथमंभूतिरुद्राक्ष

धारणंसमुदीरितम्॥द्वितीयंगुरुसेवाचशिवस्तोत्रेनतीयक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० १२३

म्॥नामोच्चारणमीशस्यचतुर्थ्यंपरिपठ्यते॥पञ्चमंदेवदेवस्य
पूजनंब्राह्मणोत्तमाः॥शिवालयस्यपुण्यस्यदर्शनंषष्ठ
मीरितम्॥तथाशिवपुराणानांश्रवणंसप्तमंद्विजाः॥नमस्का
रस्तुभक्तानांत्वष्टमंकथितंखलु॥नवमंशिवभक्तानांगृहे
भोजनमीरितम्॥दानंचदशमंज्ञेयंशिवभक्तेगुरावपि॥एवंवा
ह्यादिचिह्नानिकथितानिदशद्विजाः॥अंतराण्यपिचिह्नानि
मानसःप्रथमोजपः॥पूजाचमानसीज्ञेयाद्वितीयापरमेशितुः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

साक्षात्कारस्तृतीयस्तुब्राह्मणोब्राह्मणोत्तमाः॥इमानिवीरशैवोक्ता
निपुराविद्भिर्मुनीश्वरैः॥अंतराणायपिचिह्नानियेषांसन्तियदा
द्विजाः॥तदाभक्तानिचिह्नानिसंभवंतिमहात्मनाः॥कंठविकारः
प्रथमोगद्गदाख्यशरीरजः॥जिह्वास्पंदद्वितीयस्तुस्फुरणंत्वो
ष्ठयोरपि॥कंपनंचशरीरस्यचतुर्थंभक्तिलक्षणम्॥रोमांचः
पंचमोज्ञेयःषष्ठःस्वेदोपिकीर्तितः॥स्खलनंसप्तमंज्ञेयंअष्टमंवा
ष्पनिर्गमः॥रोदनंनवमंचिह्नंदशमंपारवश्यकम्॥एतानिदश

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰
१२५

चिह्नानि भक्तान्युक्तानि शूलिना॥ त्रिविधान्यपि चिह्नानि भक्तान्यु
क्तानि शूलिना॥ त्रिविधान्यपि चिह्नानि येषां संति महात्मनाम्॥
ते भक्ताः शंकरास्ते या सर्वलोकैक पावनाः॥ अथवा शिव भक्ता ये
भस्मरुद्राक्ष धारिणः॥ ते पूर्वोक्तानि चिह्नानि न त्यजंते यदा तदा॥
तां दृष्ट्वा पुरा मे द्रुत्या शिवभक्तान् शिवप्रियाः॥ श्रीकाशी मह
त्म्य लिख्यते॥ काशी खंडे॥ महामोहन विद्यासि काशि त्वां पर्य्ये
वैम्यहम्॥ पुराविदः प्रशंसंति त्वां महामोह हारिणीम्॥ १॥ काश्यां

वसंतियेधीराश्चापंचत्वविनिश्चयाः॥जीवन्मुक्ताश्चतेसेयावंद्याः
पूज्यास्तस्वहि॥२॥प्रयागेयत्फलंदेविमाघेचोषसिमज्जनात्॥
तत्फलंकोटिगुणितंवाराणस्यांक्षणेक्षणे॥३॥यत्रकाश्यां
शवत्वेपिजंतुर्नोःशुचितांव्रजेत्॥यतस्तत्करसंस्पर्शकरोम्य
हमपिस्वयम्॥४॥अपियोगंहियुंजानायोगिनोयतमानसाः॥
नैकेनजन्मनामुक्ताकाश्यांमुक्ताववुर्व्ययात्॥५॥निर्वाणश्चा
णनेयत्रपात्रपात्रेनचिंतये॥आनंदकाननेतन्मेदामस्थानं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० दिवानिशम्॥६॥अशाश्वतमिदंज्ञात्वावसुदेहंपरिग्रहम्॥अविमु
१२५ क्तंसदासेव्यंसंसारभयमोचकम्॥७॥अन्यत्रयत्कृतंपापंतत्का
श्यांपरिनश्यति॥वाराणस्यांकृतंपापमंतर्गेहेप्रणश्यति॥अं
तर्गेहेकृतंपापंपैशाचनरकावहम्॥पैशाच्यनरकप्राप्तिर्गच्छत्येव
वहिर्यदि॥नकल्पकोटिभिःकाश्यांकृतंकर्मप्रमुच्यते॥८॥किंतु
रुद्रपिशाचत्वंजायतेऽयुतत्रयम्॥वाराणस्यांस्थितोयोवैपा
तकेषुरतःसदा॥१०॥योनिंप्राप्यापिपैशाचींवर्षाणामयुतत्रय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म्॥पुनरत्रैवनिवसन्ज्ञानंप्राप्नोत्यनुत्तमम्॥तस्मिन्ज्ञानेप्यसंप्रा
प्तेमोक्षमाप्स्यत्यनुत्तमम्॥११॥काशीशैवशरीरारोग्रहीत्वाया
चिताप्रिसा॥नददातिहवींषीवपावकःपुनरुज्वलः॥१२॥नाहं
वसामिकैलासे न वा मंदरपर्वते॥१३॥नवा
हिमाचलेभद्रेकाश्यामेववसाम्यहम्॥१३॥वसन्नप्यत्रकैलासेवि
लासार्पयंकदाचन॥विहायकाशीमनिशंनवसामिमनोरमे॥१४
ज्योतिःपुंजमयीकाशीज्ञानरूपामनोरमा॥तयातुसदृशंवस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० नास्तिब्रह्माण्डगोलके॥१५॥नविश्वेससमंलिंगंनकाशीसदृशी
१२६ पुरी॥मणिकर्णीसमंतीर्थंनास्तिब्रह्माण्डमण्डले॥१६॥का
श्यांशरीरमात्रस्यत्यागेनैवमहेश्वरः॥दत्वापंचाक्षरंशैवंस्व
स्वरूपंप्रयच्छति॥१७॥ऋषिमुख्यानमोत्र्याव्यमिंजाबालवादि त्रि
भिः॥डिंडीरवः कृतः पूर्वंवेदरूपोनिराकुलः॥१८॥धिग्विद्याम
वतांमूर्खाः किंतयाविद्ययाधुना॥यतःकाशीवियोगार्थंमुद्यु
क्तायूयमीदृशाः॥१९॥प्रायोभवंतः सर्वेपिभिक्षोदरपराय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रागः॥ अन्यथा भवतामद्य काशीत्यागे मतिः कथम्॥२०॥ काशीत्या
गरतं मोहाद्ये पश्यंति नराधमम्॥ तेषामपि भवेत्पापं किं पुनस्तादृशा
त्मनाम्॥२१॥ काशीत्याज्येति बुद्धिश्चेत्तदा मन्निकटे ऽधुना॥ किमर्थ
मागतं यांतु श्यामं कृत्वा मुखं जडाः॥ हितमेवोच्यते विप्रा नाहितं व
च्मि सर्वथा॥ इयं काशी न मोक्तव्या न मोक्तव्यैव सर्वथा॥२३॥ भवतां
शंभवानां चेत्काशीत्यागरतिर्यदि॥ काशीत्यागरतात्मानो भवंतः
शांभवाः कथम्॥२४॥ यत्र काश्यां महादेवो लीलारूपधरः सदा॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० उमयासहितः प्रीत्या विचरत्यंबिकापतिः ॥२५॥ विश्वनाथप्रतिज्ञेयं
१२७ वाराणस्यां वरानने ॥ जीविते ऽपनदा जीवं त्वंमृते मोक्षं ददाम्यहम् ॥
२६॥ जननीगर्भदुःखानि काश्यां तु मरणे सति ॥ न बाधंते न बाधं
ते न बाधंते न संशयः ॥२७॥ संसारबीजनाशस्तु काश्यामेव प्रजा
यते ॥ सबीजनाशो नान्यत्र सत्यं सत्यं न संशयः ॥२८॥ संसारखेद
खिन्नानां काश्येकाशरणं नृप ॥ अपयमर्यस्तु निर्णितो वेदैरपि स
हस्रधा ॥२९॥ मुक्तिकन्याविवाहार्थं काश्यां मर्त्यं व्यमेकदा ॥ ततः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परन्नमरणंकदाचिदपिजायते॥३०॥भवत्यन्यत्रमरणेवहुधा
मरणव्यथा॥नभवत्येवमरणेकाश्यांतुमरणव्यथा॥३१॥०
मरणाभिमुखेशैवेकाश्यांतुमरणव्यथाम्॥दूरीकरोतिकृप
यामहेशोमंगलापतिः॥३२॥संसारसागरंघोरमसारंपातकाक
रम्॥काशीप्राप्तितरींप्राप्यतरंतिशिवतत्पराः॥३३॥अहंकाशीं
गमिष्यामीत्यपियोवाचमुञ्चरेत॥सोपिमुक्तोभवत्येवेत्या
हुर्जाबालवादिनः॥३४॥येत्यक्ततनवः काश्यांनएवातनवः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० पुनः॥ वामार्द्धं वामतनवश्चंद्रचूडा भवंति च॥ ३५॥ एकेन जन्मना

१२८ तत्र मरणावसरे ऽमलम्॥ ज्ञानमुत्पद्यते जंतोः श्रुतिभिर्यन्निरूपि

तम्॥ ३६॥ अपराधविहीनानां काशी ब्रह्मप्रयच्छति॥ शीघ्रमेवम

हादेवयातनांते ऽपराधिनाम्॥ ३७॥ सर्वथा दुर्लभा काशी दुर्लभा दु

र्लभा ध्रुवम्॥ दुर्लभा दुर्लभा सत्यं दुर्लभा दुर्लभा शुभे॥ ३८॥ पूर्वं

चैव कृता काशीपश्चात्तापं समाचरेत्॥ बलवत्तातेन वीजेन नीय

ते काशिकां पुनः॥ ३९॥ पूर्वजन्मकृताभ्यासैः मुक्तिपूर्यां शुभानने॥ त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दाकाशींचलभ्येतनान्यथासुलभाप्रिये॥४०॥पूर्वजन्मकृताचेद्दैकाशीमुक्ति
प्रदायिनी॥तदाकाशींचसंप्राप्यमृतिःस्यान्नान्यथाक्वचित्॥४१॥तथाच
शिवपुराणे॰लिं॰॥कामंभुंजन्स्वपन्क्रीडन्कुर्वन्हिविविधाःक्रियाः
॥अविमुक्तेत्यजन्प्राणान्जंतुर्मोक्षायकल्पते॥४२॥विषयासक्तचित्तो
पित्यक्तधर्मरुचिर्नरः॥इहक्षेत्रेमृतोयोवैनसंसारंपुनर्व्रजेत्॥४३॥०
कृत्वापापसहस्राणिपिशाचत्वंवरंनृणाम्॥नतुक्रतुसहस्रत्वंस्वर्गेका
शीपुरींविना॥अपायश्चमृतोयःस्यात्ससद्योमृतमश्नुते॥सपापश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म्नोयःस्यात्कालांतरेसमश्नुते॥४५॥भैरवींयातनांप्राप्यवर्षाणामयुतं
तथा॥ततोमोक्षमवाप्नोतिमुक्ताहिसुंदरि॥४६॥श्रीतिलभाण्डेश्वर
महात्म्यलिख्यते॥ब्रह्माण्डेयानितीर्थानिवसंतिस्थापितानिच॥ति
र्थामज्जनजंपुण्यंप्राप्यते स्यविलोकनात्॥१॥तिलभाण्डेश्वर
द्रष्टुर्देहेपापंनविद्यते॥केनेदंस्थापितंलिंगंकस्मिन्कालेकथंपुरा
२॥ब्रह्मापिनैवजानातिकाकपाप्यन्यदेहिनाम्॥अमुष्यभजनाद्रो
गाविनश्यंतिनसंशयः॥३॥विलयंयातिदारिद्र्यंपुत्रपौत्रादिसंपदः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न

भवंतिकामनासर्वातिलभाराडेश दर्शनात्त॥४॥ष्षिब्यांयानिलिंगानिया
नितीर्थानिसंतिहि॥तेषांदर्शनंपुरायंप्राप्यतेतस्यदर्शनात्त॥५पंचवटी
महात्म्यलिख्यते॥यःपंचवट्यांक्षराणमात्रतिष्ठन्नकारयांश्चयस्तिष्ठति
वर्षमात्रम्॥तयोस्तुतुल्यंफलमिष्टमाहुर्बुधासमस्तामुनयश्चसिद्धाः
॥१॥कपालेश्वरस्यमहिमाह्यनंतोवेत्तिकोपिना॥तथापिकिंचिद्वक्ष्यामि
श्रणुत्वंमुनिसत्तम॥२॥ब्रह्मांडेयानितीर्थानियानिलिंगानिसन्तिच
॥कपालेश्वरलिंगस्यकलांनार्हंतिषोडशीम्॥३॥कोटियज्ञविधानेनको

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१३०

ष्टलिंगार्चनेनतु॥ नरोयत्फलमाप्नोतिकपालेश्वरदर्शनात्॥४॥ दृष्ट्वाक
पालेश्वरलिंगमर्च्यनरोयदाप्नोति फलंपवित्रम्॥ नतत्फलंसागर
युक्तभूमिंदत्वाद्विजाग्र्यायरवेर्ग्रहेपि॥५॥ तिस्रःकोट्योर्धकोटीचतीर्थानिवायुरब्रवीत्॥ तेषुस्नानेनयत्पुण्यंतत्कपालेश्वरदर्शनात्॥६॥
कपालेश्वरलिंगस्यसन्निधौक्रियतेनरः॥ जपयज्ञादिकंकिंचिद्दनं
तंतत्फलंस्मृतम्॥७॥ एतत्भजनमात्रेणगवांबाधितंलभतेनरः॥ सर्वेरोगा
क्षयंयांतिकपालेश्वरदर्शनात्॥८॥ शिवरहस्येतृतीयेंशेचतुर्द्दशोध्यायेलि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ख्यते॥तज्जलं भस्मसंयुक्तं कुरु भस्मविवर्जितम्॥नग्ट ह्नातिनलेशं

भुर्गंगंवाकिमुतेतरम्॥१॥तस्मात्कुमाराः सर्वाणि पुष्पादीनि विशेष

तः॥भूतियुक्तानि देयानि मूलमंत्रेण शांभवे॥२॥अपूतमपि पूतं

स्यात्र भस्मनासंयुतं यदि॥तस्माद्भस्मयुतं देयं लिंगे विल्वादिकं सु

ताः॥३॥यदि स्याद्भस्मरहितं पीयूषमपि तत्परम्॥विषमित्यवगंत

व्यं ततो नेशार्पणं हितम्॥४॥हारेष्वपि दुकूलेषु सुवर्णाभरणेष्वपि॥

भूतिर्देया प्रयत्नेन महेशाविनिवेदने॥५॥शिवनैवेद्यपाकार्थं प्रहृत्नेभू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰ तिसंयुतैः॥पाकागारप्रवेशोपिकर्त्तव्योयत्नपूर्वकम्॥६॥पाकागारेपिदेयंस्या
२३१ त्रभस्मकिंचिज्जलान्वितम्॥शाकेजलेतंदुलेषुमुद्गादिष्वतियत्नतः॥
७॥तेनकीटादिसंबंधदोषोपिसविनश्यति॥भूतिर्नैवेद्यपात्रेपिप्रदेया
ध जलसंयुता॥८॥किंत्वयासुंयापुनःकिंचिद्भस्मान्वितंयदि॥जलमप्य
र्पितंभक्त्यातदीशायसुधांविदुः॥९॥रहस्यमन्यद्वक्ष्यामिशृणुध्वमति
सादरम्॥श्रुतेतस्मिन्नशिवाचारेभक्तिर्वृद्धिर्भविष्यति॥१०॥याशिवार्चन
सामग्रीसासर्वाभूतिपावना॥कर्त्तव्यामूलमंत्रेणातयातुष्टोभवच्छिवः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

११॥ वेदांतविषयल्लिख्यते॥ त्वमेकश्चेतनः शुद्धो जडविश्वमसत्तथा॥ अ
विद्यापिनकिंचित्साकाबुभुत्सातथापिते॥१॥ नाहंदेहोनमेदेहोबोधो
हमितिनिश्चयी॥ कैवल्यमिवसंप्राप्तोनस्मरत्यकृतंकृतम्॥२॥ मीत्य
भावेनशब्दादेरदृश्यत्वेनचात्मनः॥ विक्षेपैकाग्र्यहृदयएवमेवाहमा
स्थितः॥३०॥ व्याहृत्तमितिमध्यमपदलोपीसमासः॥ मासंकल्पविक
ल्पाभ्यांचित्तंक्षोभयचिन्मय॥ उपशाम्यसुखंतिष्ठस्वात्मन्यानंदविग्र
हे॥४॥ त्यजावधानंसर्वत्रमाकिंचिद्धृदिधारय॥ आत्मात्वंमुक्तएवासि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंविस्मरिष्यसि॥५॥ध्यानंमननंचत्यजेत्यर्थः॥आचक्ष्वश्रृणुवाता
तनानाशास्त्राण्यनेकशः॥तथापिनततस्वास्थ्यंसर्वविस्मरणादृते॥६॥भो
गंकर्मसमाधिंवाकुरुविज्ञतथापिते॥चित्तंनिरस्तसर्वाशमत्यर्थंरोचयि
ष्यति॥७॥आयासात्सकलोदुःखीनैनंजानातिकश्चन॥अनेनैवोप
देशेनधन्यःप्राप्नोतिनिर्वृतिम्॥८॥व्यापारेखिद्यतेयस्तुनिमेषोन्मेष
योरपि॥तस्यालस्यधुरीणस्यसुखंनान्यस्यकस्यचित्॥९॥मुमुक्षुरिह
संसारेमुमुक्षुरपिदृश्यते॥भोगमोक्षनिराकांक्षीविरलोहिमहाशयः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०॥यस्तुभोगेषुभुक्तेषुभवत्यनधिवासितः॥अभुक्तेषुनिराकांक्षीता
दृशोभवदुर्लभः॥११॥सानुरागांस्त्रियंदृष्ट्वामृत्युंवासमुपस्थितम्॥अ
विह्वलमनाःस्वस्थोमुक्तएवमहाशयः॥१२॥निर्वासनंहरिंदृष्ट्वातूष्णींवि
षयदंतिनः॥पलायंतेनशक्तास्तेसेवंतेकृतचाटवः॥१३॥एकाग्रतानिरो
धोवामूढैरभ्यस्यतेभृशम्॥धीराःकृत्यंनपश्यंतिसुप्तवत्स्वपदेस्थिताः॥१४
भिक्षुर्वाभूपतिर्वापियोनिष्कामःसशोभते॥भावेषुगलितायस्यशोभना
शोभनामतिः॥१५॥श्रोत्रियंदेवतांतीर्थमंगनांभूपतिंप्रियम्॥दृष्ट्वासंपूज्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव॰ धीरस्य न क्वापि हृदि वासना ॥१६॥ भृत्यैः पुत्रैः कलत्रैश्च दुर्हितैर्गोत्रजैरपि ॥०

१३३ विहस्य धिक्कृतो योगी न याति विकृतिं मनाक् ॥१७॥ सर्वत्रानवधानस्य न

किंचित्कार्यवाचिनो हृदि ॥ मुक्तात्मनो वितृप्तस्य तुलना केन जायते ॥१८॥ कर्त्त

व्यतैव संसारो न तां पश्यंति सूरयः ॥ शून्याकारा निराकारा निर्विकारा निरा

मयाः ॥१९॥ वाग्मी प्राज्ञ महोद्योगं जनं मूकजडालसम् ॥ करोति तत्त्वबो

धायमतस्त्यक्तो बुबुभुक्षुभिः ॥२०॥ अहं कर्तातमहं कर्ता न चाहं भोक्ता न भोक्तृत्वभो ॥

तानस्वरूपो भगवानात्मा हं प्रकृतेः परः ॥२१॥ अयं सोऽहमयं नाहं विभागमि

त्तिसन्मज॥सर्वमात्मेतिनिश्चित्यनिःसंकल्पःसुखीभव॥२२॥कर्त्तव्यदुःखमा
र्तंडज्वालादग्धांतरात्मनः॥कुतःप्रशमपीयूषधारासारमृतेसुखम्॥२३
॥समस्तकल्पनामात्रमात्मामुक्तःसनातनः॥इतिविज्ञायधीरोहिकिम
भ्यस्यतिबालवत्॥२४॥प्रवृत्तौवानिवृत्तौवानैवधीरस्यदुर्ग्रहः॥यदाय
ति त्कर्त्तुमायाँतत्कृत्वातिष्ठतःसुखम्॥२५॥निर्ममोनिरहंकारोनकिंचिदिति
निश्चितः॥अंतर्गलितसर्वाशःकुर्वन्नपिकरोतिन॥२६॥वासनातानवंरा
ममोक्षइत्युच्यतेबुधैः॥पदार्थवासनादार्ढ्यंबंधइत्यभिधीयते॥२७॥अ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 हंकारवशादीहाऽप्यहंकारदुराधयः ॥ अहंकारवशादापन्नाऽहंकारसमो
 रिपुः ॥ २८ ॥ शमो विचारः संतोषश्चतुर्थः साधुसंगमः ॥ एते सेव्याः
प्रयत्नेन चत्वारो द्वौ त्रयोऽथवा ॥ २९ ॥ श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रा
त्वा शुभाशुभम् ॥ न हृष्यति न च ग्लाति स शांत इति कथ्यते ॥ ३० ॥ धीरो
प्यतिबहुज्ञोपि प्रबुद्धोपि महानपि ॥ तृष्णया बध्यते जन्तुः सिंहः शृं
खलया यथा ॥ ३१ ॥ पुनरालिंग्यते कांता पुनरेव च भुज्यते ॥ दिवसे
दिवसे कुर्वन्प्रारंभं कस्मान्न लज्जसे ॥ ३२ ॥ इच्छाद्वेषसमुच्छेन द्वंद्वमो

हेनजंतवः॥धराविवरमग्नानांकीटानांसमतांगताः॥२३॥स्नेहेनधन
लोभेनलोभेनमणियोषिताम्॥अपातरमणीयेनचेतोगच्छतिपी
नताम्॥२४॥सर्वमेतद्धियात्यक्त्वायदितिष्ठसिनिश्चलः॥तदहंकारवि
लयेत्वमेवपरमेश्वरः॥२५॥दीर्घस्वप्नमिमंविद्धिदीर्घंवाचित्तविभ्र
मं॥दीर्घंवापिमनोराज्यंसंसारंरघुनंदन॥२६॥स्वरूपेनिर्मलेनित्येनि
मेषमपिविस्मृते॥दृश्यमुल्लासमायातिप्रावृषीवपयोधरः॥२७॥मत्तं
कुर्याद्यथामद्यंनष्टाविद्यमपिद्विजम्॥तद्वत्प्रारब्धभोगोपिनजहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० तिविवेकिनम्॥३८॥अवधीरणाक्तकार्योखलपरयोषित्परधनेषु
१३५ ॥काहर्निशामनुचिंत्यासंसारासारतानचप्रमदा॥३९॥यस्तुभोगे
षुभुक्तेषुनभवत्यधिवासितः॥अभुक्तेषुनिराकांक्षीतादृशोभ
वदुर्लभः॥४०॥इतियोगवासिष्ठकिंचित्संग्रहसमाप्ता॥दीक्षाका
लः॥०॥०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभामासाः॥	निषिद्धमासाः	शुभवार	८ शुभतिथि
चैत्रसर्वपुरुषार्थसिद्धिः	ज्येष्ठ१	रवि१ वुध२	द्वितीo॥३॥५॥७॥
गोपालविषये०॥	आषाढ१	सोम३ ह्रहस्पति४	१०॥११॥१२॥३०॥
१ वैशाख	भाद्रपद१	शुक्र५	निषिद्धतिथि ८
१ श्रावण०	पौष१	निषिद्धवार	प्रतिपद०॥४॥६॥
१ आश्विन		१ मंगल	८॥९॥१३॥१४॥१५॥
१ कार्तिक०यत्रसिद्धि०		१ शनि	
१ मार्गशीर्षेजतदेव			
१ माघ			
१ फाल्गुनःसर्वकामा०			

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूर्यपुरश्चरणग्रहणविधी
लिख्यते॥अथचंद्रसूर्यग्रह
णाख्येमहापर्वणिश्रीसांब
शिवप्रीत्यर्थंग्रहणमोक्षप
र्यंतंषडक्षरमहामंत्रजपम
हंकरिष्ये॥अनेनराहोःस्पर्श
मारभ्यमोक्षपर्यंतंकृतेनषड
क्षरमहामंत्रजपेनभगवान्

निषिद्धनक्षत्र ७
भरणी०कृ०आ०
आश्ले०ज्येष्ठा०
श्रवण०धनिष्ठा०७

२० शुभनक्षत्र०
अश्वि०॥रोहि०॥मृग०॥पुनर्व०
पुष्य०मघा०॥पूर्वाफाल्गु०उत्तरफा०
हस्त०चित्रा०स्वाती०विशा०अनुरा०
मूल०पूर्वाषाढोत्तराषाढे०शततार०
पूर्वभाद्रपदोत्तरभाद्र०रेवती०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीसाम्बशिवः प्रीयतां राहोः स्पर्शमारभ्य मोक्षपर्यंतं कृतस्य षडक्षर महा
मंत्रजपस्य सांगतासिद्धिद्वारा श्रीसांवशिवप्रीत्यर्थं दशांशविहितहोमा
शक्तेस्तच्चतुर्गुणितषडक्षरमहामंत्रजपमहं करिष्ये॥ अनेनजपेन
भगवान् दीनवंधुः श्रीसाम्बशिवः प्रीयताम्॥ राहो० शिवप्रीत्यर्थं [illegible] हो
मदशांशेन तर्पणमहं करिष्ये॥ अनेन तर्पणेन सर्वदेवशिखामणिः २
श्रीसाम्बशिवः प्रीयतां राहो० शिवप्रीत्यर्थं तर्पणादशांशेन मार्जनमहं
करिष्ये॥ अनेन मार्जनेन शांगवंधुः श्रीसांबशिवः प्रीयतां तर्पणं चशे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० भनद्रव्यमिश्रितजलेनतथाभावितेनवाजलेनांजलिनाकार्यंतत्रमंत्रश्चेत्थं
२२७ बोध्यः मूलमंत्रमुच्चार्यश्रीसांबशिवंतर्पयामि मार्जनप्रकारश्चेत्थं श्री
साम्बशिवंसुप्रसन्नंकल्हारगारसादहृदयंबरप्रदानलोलंसुपुष्पनवको
मलाच्छिद्रबिल्वदलव्याप्तस्वशिरसिस्थितंविचिंत्य मूलमंत्रमुच्चार्य
श्रीसाम्बशिवःमभिषिंचामि शिवाय० राहे० शिवप्रीत्यर्थंयथासं
भवंब्राह्मणभोजनंभवोऽचरिष्ये॥ असंभवेतुराहे० शिवप्रीत्यर्थंविहि
तब्राह्मणभोजनासंभवात् द्रव्यद्वाराब्राह्मणभोजनमहंकरिष्ये॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवरहस्ये॥वेदसिद्धेषुधर्मेषुत्रिपुराङ्कुभस्मगुंठनम्॥रुद्रलिंगार्चनंचै
वमुख्यमाहुर्द्विजास्तिकाः॥१॥त्रिपुण्ड्रेणविनाभ्राद्धंत्रिपुण्ड्रेनविना
हुतम्॥त्रिपुण्ड्रेणविनादानंराक्षसंतत्प्रकीर्तितम्॥२॥वेदस्याध्यय
नेशूद्रोनाधिकारीयथाभवेत्॥त्रिपुण्ड्रेणविनाविप्रोनाधिकारीशिवा
र्चने॥३॥धिग्भस्मरहितंभालंधिग्ग्राममशिवालयम्॥धिगनिशा
र्चनंजन्मधिग्विद्यामशिवाश्रयम्॥४॥धिक्धिग्भालंभस्महिनं
विहीनंधिक्धिग्गात्रंभस्मरुद्राक्षहीनम्॥धिक्धिक्चित्तंशंकरे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्यानशून्यंधिक्धिग्गेहंलिंगसंबंधशून्यम्॥५॥श्रीकरंचपवित्रंचशो
करोगनिवारणम्॥लोकेवशीकरंप्रोक्तंभस्मत्रैलोक्यपावनम्॥विभू
तिर्यस्यनोभालेनांगेरुद्राक्षधारणम्॥नहीशिवमईवाणीतंत्यजेदं
त्यजंयथा॥७॥शिवपुराणे॥ब्रह्मकुंडसमुद्भूतंभस्मदद्याद्द्विजात
ये॥चतुरार्णवपर्यंतातेनदत्तावसुंधरा॥८॥केशकीटादिनिर्दुष्टं
भस्मनासंस्कृतंतथा॥आज्येनचंचुकाकादिदूषितंनैवभक्षयेत्॥
९॥पराशरपुराणे॥शिवरहस्ये॥प्राप्तेभोजनकालेनुमक्षिकाके

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शादुषिते॥स्पृष्ट्वातुसलिलंभस्मप्रक्षेप्तव्यंविशुद्धय ३ अन्ननेदूषितान्न
शुद्धि॥१०॥रुद्राक्षधारणाद्यापितथापंचाक्षरिजपात्॥भस्मत्रिपुण्ड्र
करणात्सर्वथ्रीतोभविष्यति॥११॥आयुरारोग्यमैश्वर्यंतत्वज्ञानम
नामयम्॥सर्वतिश्रीमहादेवपूजयेन्नास्तिहिश्रुतिः॥१२॥भानुः॥आल
स्येनविनाशिवार्चनरतिर्लिंगेषुतुंगेषुतेजातावेदधुनापरंनवनिधि
प्राप्तिःकरेसंततम्॥एतत्तावदिहानुषंगिकमितिज्ञेयंफलंतत्फलंयत्तद्
ज्ञमपारवेदशिखरैर्वक्तुंनशक्यंखलु॥१३॥यावत्तेधनमस्तितावदधुनासं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गायभक्त्यापरंदेयंतत्तुसहस्रकोटिगुणितंदास्यत्यवश्यंधनम्॥तत्रास्मद्
चनेतवापिवहुधाविश्वासस्तवास्त्वतःपापाब्धिप्लवंयोभविष्यतिशुभंभो
धिश्चसंभावितः॥१४॥शिवार्चनाकारमहानलेदग्धानिपापामितकोट
राशि॥जितंजगत्सर्वमतःपरंमेकर्तव्यमन्यन्नविभातिनूने॥१५॥संसा
रसागरविशोषकमिंदुमौलेपादारविंद भजनंप्रवदंतिसंतः॥तस्मा
द्विहायसकलंविषयंविशिष्यगौरीपतिंसततमाशुवयंभजामः॥१६॥
यदाशंकराराधनासक्तमेतन्मनःस्यात्तदाकालभीतिःकुतःस्यात्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वयंशंकराराधनेनैवकालंनयामोनयामोनयामोवयञ्च॥१७॥सह
स्रजिह्वोपिनयस्यतत्वंस्तोतुंसमर्थश्चतुराननोवा॥नारायणोगावात्
मुमासहायमानंदकंदंहृदिभावयामः॥१८॥यमाहुरीशंपरमंवरे
ण्यंसर्गस्थितीनामपिहेतुभूतम्॥तमेवदेवोत्तममिंदुखंडशोभा
समालंकृतमाश्रयामः॥यस्यप्रसादादशिवोपहारोयस्यप्रसादाज्ञान
नापहारःयस्यप्रसादेनजरापहारस्तमेवदेवंशिवमाश्रयामः॥२०॥दूर्वा
कुरैरपिनवैर्नवविल्वपत्रैर्गंगाजलैरनिलशीतलपुष्पयुक्तैः॥प्रम्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० च्येल्लिंगमिहशंगमनंगशत्रुंगौरीपतिंसततमेववयंभजामः॥२४॥किं
१४० रत्नाभरणैर्विचित्रवसनैःकिंचंदनैर्वाफलैःस्रग्भिर्वाशिवपूजनेन
तुपरंस्वांतंप्रशांतंमुहुः॥संतुष्टंखलुसंततंशिवपदांभोजार्चनैःकेव
लंनेयंमेववयइत्यंवैमिनस्तुतैःकृत्यंकिंचिद्दृश्यते॥२५॥अस्माकंपर
लोकसाधनमिदंभूतिःपरंभूषणंरुद्राक्षामलकंकरागादिकलिता
तावत्तनुस्तावता॥श्रीपंचाक्षरकीर्त्तनेनरसनापीयूषवांछामपित्य
क्तातिष्ठतिनिष्ठुरंचहृदयंशंगान्यदेवेष्वपि॥२६॥अहोनजानंतिवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मूढचित्ताःशैलेंद्रजाकांतसमर्चनानि॥संसारदुःखादिभयापहानिमोक्ष
ति प्रदानिँविशेषतस्ते॥२४॥शर्वाणीरमणार्चनेयदिमैःपुरायैःप्रवृत्तंतदाक
ल्याणानिपदेपदेपिवहुधासंपत्प्रवाहोदयः॥आपत्कानननाशएवव
हुधापापाब्धिसंशोषणंतेनस्यादितिवुद्धिरस्यसममूढदांतवाक्यैर्मुहुः॥
२५॥सर्वज्ञाभयमेवनःशिवपदांभोजार्चनात्सर्वदासंतोषांवुधिवृद्धिरे
वसततंसर्वापदांविप्लवः॥एतद्भाग्यमशंभवस्यनकदाप्यस्तीत्यतः
शाम्भवेष्वस्तिस्वस्तिमतीमतिःशिवतरध्यानानुकूलासती॥२६॥विप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव०
१४१

न्नाशस्यायंसमयइतिमन्येमुहुरहंमहादेवोयस्मादसकृदधुनास्मर्यतइति॥ अ
होधन्यःसोयंसमयइतिमन्येमुहुरहंमुहुर्मन्येमन्येमुहुरपिमुहुर्मोदसहि
तः॥२७॥ महेशंभजंतःस्मरंतःसकृद्वानसंसारभीतिंप्रपश्यंतिकालम्॥
नपश्यंतिदुःखानिकान्यप्यतोहंमहेशंविनान्यंनजानेनजाने॥२८॥ वयं
धन्यतमाएवशिवलिंगार्चनप्रियाः॥ प्रीतिःशिवार्चनेलोकेदुर्लभाखलु
वस्तुतः॥२९॥ नदारेषुकुमारेषुनधनेषुनिधिष्वपि॥ अस्माकंप्री
तिरधुनाकिंतुसाशिवपूजने॥३०॥ ममव्रतंमहेशस्यपूजनंसर्वदाखलु॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वृतांतरंनजानेहंशापथ्यःशिवपादयोः॥३१॥कार्यांतरेषुव्यासंगेशिवलिंग
समर्चनम्॥विघ्नितंस्यादितित्यक्तंमयाकार्यान्तरंखलु॥३२॥अनेकज
न्मशुद्धानांश्रौतस्मार्त्तानुवर्त्तिनाम्॥हरःश्रेष्ठोहरेःसाक्षादितिबुद्धि
र्हिजायते॥३३॥अग्नेःपृष्ठेवामभागेसमीपेगर्भमंदिरे॥जपहोमनम
स्काराःघ्नन्तिपुरायंपुराकृतम्॥३४॥स्पर्शःकार्योमहेशस्यधृत्वावि
ल्वदलंकरे॥अयंमे हस्तमंत्रेतिनियमेनविधाजपेत्॥३५॥अ
यंमेहस्तइत्याद्यैःसव्यहस्ततलेनवः॥उपस्पर्शोहिलिंगपार्श्वेसपापेभ्यो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० विमुच्यते॥३६॥भुवनत्रयतीर्थानि सर्वाण्यपि निशामुखे॥ब्रह्मांडं समुपा
१४२ श्रित्य तिष्ठंति मुनिसत्तमाः॥३७॥ब्रह्मांडं यः स्पृशेत्सायं स तीर्थान्यखि
लान्यपि॥स्पृष्टस्नातश्च सततं पूतश्चात्र न संशयः॥३८॥त्रिपुण्ड्रधार
णात्पूर्वं तदनंतरमेव वा॥विप्रश्चंदनादीनि ललाटादौ न लापय॥३९॥
रुद्राक्षधारणं शुद्धं केवलं भस्मधारणम्॥लिंगार्चनं केवलं च यस्य शै
वः स उच्यते॥४०॥शिवः प्रसंगाक्कमविष्यतीति विचार्य तिष्ठंत्यपि॥अतः
परं मंगलहेतुरीशो महेश्वरः सन्निहितस्ततस्मात्॥महेश्वराभ्यागमने

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भवानीकुमारमादायगणेशमादौ॥ आयायास्यतीतिद्रुतमेवनंदीभृंगीचसर्वैः
स्वगणैःसमेतः॥पादौप्रक्ष्याल्यनत्वाधभस्मधारणपूर्वकम्॥मंत्रमेनेनंस
मुच्चार्यविल्ववृक्षंसमारुहेत्॥नमस्तेविल्ववृक्षायनवारुणदलायच॥पत्रं
तेशिवपूजार्थंगृह्णाम्यपक्षमस्वमे॥इतिप्रार्थ्यमहावृक्षंगृह्णीयात्पत्रमुत्त
मम्॥अमृतोद्भववृक्षोहत्वसदात्वंशंकरप्रीय॥क्षमस्वशिवपूजार्थंगृह्णामद्य
क्षमस्वमे॥पादस्पर्शनंशिवद्वारिचार्मेयःस्थापयिष्यति॥सकोटीकल्पपर्यंतं
यातिचंडालतां [illegible] ॥तदुग्रवेगंदिशिदिश्युपर्यधोविसर्पदुत्सर्पदसह्यवीर्यं

तांस

 भीताः प्रजा दुद्रुवुरंगसेश्वराञ्चरक्षमाराणाः शरणं सदाशिवम् ॥ पादांभोजेतव
 परिमिलद्दिव्यमृंगावलीढे चंद्रापीडभ्रयतु सततं चंचरीकस्य लीलाम् ॥
दिव्यभृंगाऋग्वेदएवमधुकृतः ऋग्वेदएवपुष्पं यजूंष्येवमधुकृतः ॥ ब्र
ह्मतर्क ॥ अथ पत्लिंगविग्रहवत्वं विश्वेश्वरस्य ऊनविंशतिभिर्लिंगैः ॥ सर्वे
षामपि लिंगानां मौलित्वं कृत्तिवाससः ॥ ओंकारेशः शिखायेत्ता लोचना
नि त्रिलोचनः ॥ गोकर्णभारभृतेशौ तत्कर्णोपरिकीर्त्तितौ ॥ विश्वेश्वरा
विमुक्तौ च द्वावेतौ दक्षिणौ करौ ॥ धर्म्मेशमणिकर्णीशौ द्वावेतौ दक्षिणौ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिव० तरौ॥कालेश्वरकपर्द्दीशौचवरगावतिनिर्म्मलौ॥ज्येष्ठेश्वरोनितंवश्चना
१४४ भिर्वैमध्यमेश्वरः॥कपर्द्दीस्यमहादेवःशिरोभूषाश्रुतीश्वरः॥चंद्रे
शोहृदयंतस्यआत्मावीरेश्वरःपरः॥लिंगंतस्यतुकेदारःशुक्रंशुक्रेश्व
रंविदुः॥अन्यानियानिलिंगानिपरंकोट्यमितिनिच॥तेयानिनखलो
मानिवपुषोभूषणान्यपि॥तत्रयात्राकालेदयानि०॥शिवमस्तु०॥३०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवार्चनदीपिका सम्पूर्णा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri